# किरातार्जुनीयम्

Exported from ambuda.org on 2025-12-23 07:27:30 UTC

1.1

श्रियः कुरूणाम् अधिपस्य पालनीं प्रजासु वृत्तिं यम् अयुङ्क्त वेदितुम् ।स वर्णिलिङ्गी विदितः समाययौ युधिष्ठिरं द्वैतवने वनेचरः ॥

1.2

कृतप्रणामस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः ।न विव्यथे तस्य मनो न हि प्रियं प्रवक्तुम् इच्छन्ति मृषा हितैषिणः ॥

1.3

द्विषां विघाताय विधातुम् इच्छतो रहस्य् अनुज्ञाम् अधिगम्य भूभृतः ।स सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थाम् इति वाचम् आदधे ॥

1.4

क्रियासु युक्तैर् नृप चारचक्षुषो न वञ्चनीयाः प्रभवो ऽनुजीविभिः ।अतो ऽर्हसि क्षन्तुम् असाधु साधु वा हितं मनोहारि च दुर्लभं वचः ॥

1.5

स किंसखा साधु न शास्ति यो ऽधिपं हितान् न यः संशृणुते स किंप्रभुः ।सदानुकूलेषु हि कुर्वते रतिं नृपेष्व् अमात्येषु च सर्वसम्पदः ॥

1.6

निसर्गदुर्बोधम् अबोधविक्लवाः क्व भूपतीनां चरितं क्व जन्तवः ।तवानुभावो ऽयम् अबोधि यन् मया निगूढतत्त्वं नयवर्त्म विद्विषाम् ॥

1.7

विशङ्कमानो भवतः पराभवं नृपासनस्थो ऽपि वनाधिवासिनः ।दुरोदरच्छद्मजितां समीहते नयेन जेतुं जगतीं सुयोधनः ॥

1.8

तथापि जिह्मः स भवज्जिगीषया तनोति शुभ्रं गुणसम्पदा यशः ।समुन्नयन् भूतिम् अनार्यसंगमाद् वरं विरोधो ऽपि समं महात्मभिः ॥

1.9

कृतारिषड्वर्गजयेन मानवीम् अगम्यरूपां पदवीं प्रपित्सुना ।विभज्य नक्तंदिनम् अस्ततन्द्रिणा वितन्यते तेन नयेन पौरुषम् ॥

1.10

सखीन् इव प्रीतियुजो ऽनुजीविनः समानमानान् सुहृदश् च बन्धुभिः ।स सन्ततं दर्शयते गतस्मयः कृताधिपत्याम् इव साधु बन्धुताम् ॥

1.11

असक्तम् आराधयतो यथायथं विभज्य भक्त्या समपक्षपातया ।गुणानुरागाद् इव सख्यम् ईयिवान् न बाधते ऽस्य त्रिगणः परस्परम् ॥

1.12

निरत्ययं साम न दानवर्जितं न भूरि दानं विरहय्य सत्क्रियाम् ।प्रवर्तते तस्य विशेषशालिनी गुणानुरोधेन विना न सत्क्रिया ॥

1.13

वसूनि वाञ्छन् न वशी न मन्युना स्वधर्म इत्य् एव निवृत्तकारणः ।गुरूपदिष्टेन रिपौ सुते ऽपि वा निहन्ति दण्डेन स धर्मविप्लवम् ॥

1.14

विधाय रक्षान् परितः परेतरान् अशङ्किताकारम् उपैति शङ्कितः ।क्रियापवर्गेष्व् अनुजीविसात्कृताः कृतज्ञताम् अस्य वदन्ति सम्पदः ॥

1.15

अनारतं तेन पदेषु लम्भिता विभज्य सम्यग् विनियोगसत्क्रियाम् ।फलन्त्य् उपायाः परिबृंहितायतीर् उपेत्य संघर्षम् इवार्थसम्पदः ॥

1.16

अनेकराजन्यरथाश्वसंकुलं तदीयम् आस्थाननिकेतनाजिरम् ।नयत्य् अयुग्मच्छदगन्धिर् आर्द्रतां भृशं नृपोपायनदन्तिनां मदः ॥

1.17

सुखेन लभ्या दधतः कृषीवलैर् अकृष्टपच्या इव सस्यसम्पदः ।वितन्वति क्षेमम् अदेवमातृकाश् चिराय तस्मिन् कुरवश् चकासति ॥

1.18

महौजसो मानधना धनार्चिता धनुर्भृतः संयति लब्धकीर्तयः ।न संहतास् तस्य न भेदवृत्तयः प्रियाणि वाञ्छन्त्य् असुभिः समीहितुम् ॥

1.19

उदारकीर्तेर् उदयं दयावतः प्रशान्तबाधं दिशतो ऽभिरक्षया ।स्वयं प्रदुग्धे ऽस्य गुणैर् उपस्नुता वसूपमानस्य वसूनि मेदिनी ॥

1.20

महीभुजां सच्चरितैश् चरैः क्रियाः स वेद निःशेसम् अशेषितक्रियः ।महोदयैस् तस्य हितानुबन्धिभिः प्रतीयते धातुर् इवेहितं फलैः ॥

1.21

न तेन सज्यं क्वचिद् उद्यतं धनुर् न वा कृतं कोपविजिह्मम् आननम् ।गुणानुरागेण शिरोभिर् उह्यते नराधिपैर् माल्यम् इवास्य शासनम् ॥

1.22

स यौवराज्ये नवयौवनोद्धतं निधाय दुःशासनम् इद्धशासनः ।मखेष्व् अखिन्नो ऽनुमतः पुरोधसा धिनोति हव्येन हिरण्यरेतसम् ॥

1.23

प्रलीनभूपालम् अपि स्थिरायति प्रशासद् आवारिधि मण्डलं भुवः ।स चिन्तयत्य् एव भियस् त्वद् एष्यतीर् अहो दुरन्ता बलवद्विरोधिता ॥

1.24

कथाप्रसङ्गेन जनैर् उदाहृताद् अनुस्मृताखण्डलसूनुविक्रमः ।तवाभिधानाद् व्यथते नताननः स दुःसहान् मन्त्रपदाद् इवोरगः ॥

1.25

तद् आशु कर्तुं त्वयि जिह्मम् उद्यते विधीयतां तत्र विधेयम् उत्तरम् ।परप्रणीतानि वचांसि चिन्वतां प्रवृत्तिसाराः खलु मादृशां धियः ॥

1.26

इतीरयित्वा गिरम् आत्तसत्क्रिये गते ऽथ पत्यौ वनसंनिवासिनाम् ।प्रविश्य कृष्णा सदनं महीभुजा तद् आचचक्षे ऽनुजसन्निधौ वचः ॥

1.27

निशम्य सिद्धिं द्विषताम् अपाकृतीस् ततस् ततस्त्या विनियन्तुम् अक्षमा ।नृपस्य मन्युव्यवसायदीपिनीर् उदाजहार द्रुपदात्मजा गिरः ॥

1.28

भवादृशेषु प्रमदाजनोदितं भवत्य् अधिक्षेप इवानुशासनम् ।तथापि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः ॥

1.29

अखण्डम् आखण्डलतुल्यधामभिश् चिरं धृता भूपतिभिः स्ववंशजैः ।त्वया स्वहस्तेन मही मदच्युता मतङ्गजेन स्रग् इवापवर्जिता ॥

1.30

व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः ।प्रविश्य हि घ्नन्ति शठास् तथाविधान् असंवृताङ्गान् निशिता इवेषवः ॥

1.31

गुणानुरक्ताम् अनुरक्तसाधनः कुलाभिमानी कुलजां नराधिपः ।परैस् त्वदन्यः क इवापहारयेन् मनोरमाम् आत्मवधूम् इव श्रियम् ॥

1.32

भवन्तम् एतर्हि मनस्विगर्हिते विवर्तमानं नरदेव वर्त्मनि ।कथं न मन्युर् ज्वलयत्य् उदीरितः शमीतरुं शुष्कम् इवाग्निर् उच्छिखः ॥

1.33

अवन्ध्यकोपस्य निहन्तुर् आपदां भवन्ति वश्याः स्वयम् एव देहिनः ।अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः ॥

1.34

परिभ्रमंल् लोहितचन्दनोचितः पदातिर् अन्तर्गिरि रेणुरूषितः ।महारथः सत्यधनस्य मानसं दुनोति ते कच्चिद् अयं वृकोदरः ॥

1.35

विजित्य यः प्राज्यम् अयच्छद् उत्तरान् कुरून् अकुप्यं वसु वासवोपमः ।स वल्कवासांसि तवाधुनाहरन् करोति मन्युं न कथं धनंजयः ॥

1.36

वनान्तशय्याकठिनीकृताकृती कचाचितौ विष्वग् इवागजौ गजौ ।कथं त्वम् एतौ धृतिसंयमौ यमौ विलोकयन्न् उत्सहसे न बाधितुम् ॥

1.37

इमाम् अहं वेद न तावकीं धियं विचित्ररूपाः खलु चित्तवृत्तयः ।विचिन्तयन्त्या भवदापदं परां रुजन्ति चेतः प्रसभं ममाधयः ॥

1.38

पुराधिरूढः शयनं महाधनं विबोध्यसे यः स्तुतिगीतिमङ्गलैः ।अदभ्रदर्भाम् अधिशय्य स स्थलीं जहासि निद्राम् अशिवैः शिवारुतैः ॥

1.39

पुरोपनीतं नृप रामणीयकं द्विजातिशेषेण यद् एतद् अन्धसा ।तद् अद्य ते वन्यफलाशिनः परं परैति कार्श्यं यशसा समं वपुः ॥

1.40

अनारतं यौ मणिपीठशायिनाव् अरञ्जयद् राजशिरःस्रजां रजः ।निषीदतस् तौ चरणौ वनेषु ते मृगद्विजालूनशिखेषु बर्हिषाम् ॥

1.41

द्विषन्निमित्ता यद् इयं दशा ततः समूलम् उन्मूलयतीव मे मनः ।परैर् अपर्यासितवीर्यसम्पदां पराभवो ऽप्य् उत्सव एव मानिनाम् ॥

1.42

विहाय शान्तिं नृप धाम तत् पुनः प्रसीद संधेहि वधाय विद्विषाम् ।व्रजन्ति शत्रून् अवधूय निःस्पृहाः शमेन सिद्धिं मुनयो न भूभृतः ॥

1.43

पुरःसरा धामवतां यशोधनाः सुदुःसहं प्राप्य निकारम् ईदृशम् ।भवादृशाश् चेद् अधिकुर्वते परान् निराश्रया हन्त हता मनस्विता ॥

1.44

अथ क्षमाम् एव निरस्तसाधनश् चिराय पर्येषि सुखस्य साधनम् ।विहाय लक्ष्मीपतिलक्ष्म कार्मुकं जटाधरः सञ् जुहुधीह पावकम् ॥

1.45

न समयपरिरक्षणं क्षमं ते निकृतिपरेषु परेषु भूरिधाम्नः ।अरिषु हि विजयार्थिनः क्षितीशा विदधति सोपधि संधिदूषणानि ॥

1.46

विधिसमयनियोगाद् दीप्तिसंहारजिह्मं शिथिलबलम् अगाधे मग्नम् आपत्पयोधौ ।रिपुतिमिरम् उदस्योदीयमानं दिनादौ दिनकृतम् इव लक्ष्मीस् त्वां समभ्येतु भूयः ॥

2.1

विहितां प्रियया मनःप्रियाम् अथ निश्चित्य गिरं गरीयसीम् ।उपपत्तिमद् ऊर्जिताश्रयं नृपम् ऊचे वचनं वृकोदरः ॥

2.2

यद् अवोचत वीक्ष्य मानिनी परितः स्नेहमयेन चक्षुषा ।अपि वागधिपस्य दुर्वचं वचनं तद् विदधीत विस्मयम् ॥

2.3

विषमो ऽपि विगाह्यते नयः कृततीर्थः पयसाम् इवाशयः ।स तु तत्र विशेषदुर्लभः सद् उपन्यस्यति कृत्यवर्त्म यः ॥

2.4

परिणामसुखे गरीयसि व्यथके ऽस्मिन् वचसि क्षतौजसाम् ।अतिवीर्यवतीव भेषजे बहुर् अल्पीयसि दृश्यते गुणः ॥

2.5

इयम् इष्टगुणाय रोचतां रुचिरार्था भवते ऽपि भारती ।ननु वक्तृविशेषनिःस्पृहा गुणगृह्या वचने विपश्चितः ॥

2.6

चतसृष्व् अपि ते विवेकिनी नृप विद्यासु निरूढिम् आगता ।कथम् एत्य मतिर् विपर्ययं करिणी पङ्कम् इवावसीदति ॥

2.7

विधुरं किम् अतः परं परैर् अवगीतां गमिते दशाम् इमाम् ।अवसीदति यत् सुरैर् अपि त्वयि सम्भावितवृत्ति पौरुषम् ॥

2.8

द्विषताम् उदयः सुमेधसा गुरुर् अस्वन्ततरः सुमर्षणः ।न महान् अपि भूतिम् इच्छता फलसम्पत्प्रवणः परिक्षयः ॥

2.9

अचिरेण परस्य भूयसीं विपरीतां विगणय्य चात्मनः ।क्षययुक्तिम् उपेक्षते कृती कुरुते तत्प्रतिकारम् अन्यथा ॥

2.10

अनुपालयताम् उदेष्यतीं प्रभुशक्तिं द्विषताम् अनीहया ।अपयान्त्य् अचिरान् महीभुजां जननिर्वादभयाद् इव श्रियः ॥

2.11

क्षययुक्तम् अपि स्वभावजं दधतं धाम शिवं समृद्धये ।प्रणमन्त्य् अनपायम् उत्थितं प्रतिपच्चन्द्रम् इव प्रजा नृपम् ॥

2.12

प्रभवः खलु कोशदण्डयोः कृतपञ्चाङ्गविनिर्णयो नयः ।स विधेयपदेषु दक्षतां नियतिं लोक इवानुरुध्यते ॥

2.13

अभिमानवतो मनस्विनः प्रियम् उच्चैः पदम् आरुरुक्षतः ।विनिपातनिवर्तनक्षमं मतम् आलम्बनम् आत्मपौरुषम् ॥

2.14

विपदो ऽभिभवन्त्य् अविक्रमं रहयत्य् आपदुपेतम् आयतिः ।नियता लघुता निरायतेर् अगरीयान् न पदं नृपश्रियः ॥

2.15

तद् अलं प्रतिपक्षम् उन्नतेर् अवलम्ब्य व्यवसायवन्ध्यताम् ।निवसन्ति पराक्रमाश्रया न विषादेन समं समृद्धयः ॥

2.16

अथ चेद् अवधिः प्रतीक्ष्यते कथम् आविष्कृतजिह्मवृत्तिना ।धृतराष्ट्रसुतेन सुत्यज्याश् चिरम् आस्वाद्य नरेन्द्रसम्पदः ॥

2.17

द्विषता विहितं त्वयाथवा यदि लब्धा पुनर् आत्मनः पदम् ।जननाथ तवानुजन्मनां कृतम् आविष्कृतपौरुषैर् भुजैः ॥

2.18

मदसिक्तमुखैर् मृगाधिपः करिभिर् वर्तयति स्वयं हतैः ।लघयन् खलु तेजसा जगन् न महान् इच्छति भूतिम् अन्यतः ॥

2.19

अभिमानधनस्य गत्वरैर् असुभिः स्थास्नु यशश् चिचीषतः ।अचिरांशुविलासचञ्चला ननु लक्ष्मीः फलम् आनुषङ्गिकम् ॥

2.20

ज्वलितं न हिरण्यरेतसं चयम् आस्कन्दति भस्मनां जनः ।अभिभूतिभयाद् असून् अतः सुखम् उज्झन्ति न धाम मानिनः ॥

2.21

किम् अवेक्ष्य फलं पयोधरान् ध्वनतः प्रार्थयते मृगाधिपः ।प्रकृतिः खलु सा महीयसः सहते नान्यसमुन्नतिं यया ॥

2.22

कुरु तन् मतिम् एव विक्रमे नृप निर्धूय तमः प्रमादजम् ।ध्रुवम् एतद् अवेहि विद्विषां त्वदनुत्साहहता विपत्तयः ॥

2.23

द्विरदान् इव दिग्विभावितांश् चतुरस् तोयनिधीन् इवायतः ।प्रसहेत रणे तवानुजान् द्विषतां कः शतमन्युतेजसः ॥

2.24

ज्वलतस् तव जातवेदसः सततं वैरिकृतस्य चेतसि ।विदधातु शमं शिवेतरा रिपुनारीनयनाम्बुसन्ततिः ॥

2.25

इति दर्शितविक्रियं सुतं मरुतः कोपपरीतमानसम् ।उपसान्त्वयितुं महीपतिर् द्विरदं दुष्टम् इवोपचक्रमे ॥

2.26

अपवर्जितविप्लवे शुचय् हृदयग्राहिणि मङ्गलास्पदे ।विमला तव विस्तरे गिरां मतिर् आदर्श इवाभिदृश्यते ॥

2.27

स्फुटता न पदैर् अपाकृता न च न स्वीकृतम् अर्थगौरवम् ।रचिता पृथगर्थता गिरां न च सामर्थ्यम् अपोहितं क्वचित् ॥

2.28

उपपत्तिर् उदाहृता बलाद् अनुमानेन न चागमः क्षतः ।इदम् ईदृग् अनीदृगाशयः प्रसभं वक्तुम् उपक्रमेत कः ॥

2.29

अवितृप्ततया तथापि मे हृदयं निर्णयम् एव धावति ।अवसाययितुं क्षमाः सुखं न विधेयेषु विशेषसम्पदः ॥

2.30

सहसा विदधीत न क्रियाम् अविवेकः परम् आपदां पदम् ।वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयम् एव सम्पदः ॥

2.31

अभिवर्षति यो ऽनुपालयन् विधिबीजानि विवेकवारिणा ।स सदा फलशालिनीं क्रियां शरदं लोक इवाधितिष्ठति ॥

2.32

शुचि भूषयति श्रुतं वपुः प्रशमस् तस्य भवत्य् अलंक्रिया ।प्रशमाभरणं पराक्रमः स नयापादितसिद्धिभूषणः ॥

2.33

मतिभेदतमस्तिरोहिते गहने कृत्यविधौ विवेकिनाम् ।सुकृतः परिशुद्ध आगमः कुरुते दीप इवार्थदर्शनम् ॥

2.34

स्पृहणीयगुणैर् महात्मभिश् चरिते वर्त्मनि यच्छतां मनः ।विधिहेतुर् अहेतुर् आगसां विनिपातो ऽपि समः समुन्नतेः ॥

2.35

शिवम् औपयिकं गरीयसीं फलनिष्पत्तिम् अदूषितायतिम् ।विगणय्य नयन्ति पौरुषं विजितक्रोधरया जिगीषवः ॥

2.36

अपनेयम् उदेतुम् इच्छता तिमिरं रोषमयं धिया पुरः ।अविभिद्य निशाकृतं तमः प्रभया नांशुमताप्य् उदीयते ॥

2.37

बलवान् अपि कोपजन्मनस् तमसो नाभिभवं रुणद्धि यः ।क्षयपक्ष इवैन्दवीः कलाः सकला हन्ति स शक्तिसम्पदः ॥

2.38

समवृत्तिर् उपैति मार्दवं समये यश् च तनोति तिग्मताम् ।अधितिष्ठति लोकम् ओजसा स विवस्वान् इव मेदिनीपतिः ॥

2.39

क्व चिराय परिग्रहः श्रियां क्व च दुष्टेन्द्रियवाजिवश्यता ।शरदभ्रचलाश् चलेन्द्रियैर् असुरक्षा हि बहुच्छलाः श्रियः ॥

2.40

किम् असामयिकं वितन्वता मनसः क्षोभम् उपात्तरंहसः ।क्रियते पतिर् उच्चकैर् अपां भवता धीरतयाधरीकृतः ॥

2.41

श्रुतम् अप्य् अधिगम्य ये रिपून् विनयन्ते स्म न शरीरजन्मनः ।जनयन्त्य् अचिराय सम्पदाम् अयशस् ते खलु चापलाश्रयम् ॥

2.42

अतिपातितकालसाधना स्वशरीरेन्द्रियवर्गतापनी ।जनवन् न भवन्तम् अक्षमा नयसिद्धेर् अपनेतुम् अर्हति ॥

2.43

उपकारकम् आयतेर् भृशं प्रसवः कर्मफलस्य भूरिणः ।अनपायि निबर्हणं द्विषां न तितिक्षासमम् अस्ति साधनम् ॥

2.44

प्रणतिप्रवणान् विहाय नः सहजस्नेहनिबद्धचेतसः ।प्रणमन्ति सदा सुयोधनं प्रथमे मानभृतां न वृष्णयः ॥

2.45

सुहृदः सहजास् तथेतरे मतम् एषां न विलङ्घयन्ति ये ।विनयाद् इव यापयन्ति ते धृतराष्ट्रात्मजम् आत्मसिद्धये ॥

2.46

अभियोग इमान् महीभुजो भवता तस्य ततः कृतावधेः ।प्रविघाटयिता समुत्पतन् हरिदश्वः कमलाकरान् इव ॥

2.47

उपजापसहान् विलङ्घयन् स विधाता नृपतीन् मदोद्धतः ।सहते न जनो ऽप्य् अधःक्रियां किम् उ लोकाधिकधाम राजकम् ॥

2.48

असमापितकृत्यसम्पदां हतवेगं विनयेन तावता ।प्रभवन्त्य् अभिमानशालिनां मदम् उत्तम्भयितुं विभूतयः ॥

2.49

मदमानसमुद्धतं नृपं न वियुङ्क्ते नियमेन मूढता ।अतिमूढ उदस्यते नयान् नयहीनाद् अपरज्यते जनः ॥

2.50

अपरागसमीरणेरितः क्रमशीर्णाकुलमूलसन्ततिः ।सुकरस् तरुवत् सहिष्णुना रिपुर् उन्मूलयितुं महान् अपि ॥

2.51

अणुर् अप्य् उपहन्ति विग्रहः प्रभुम् अन्तःप्रकृतिप्रकोपजः ।अखिलं हि हिनस्ति भूधरं तरुशाखान्तनिघर्षजो ऽनलः ॥

2.52

मतिमान् विनयप्रमाथिनः समुपेक्षेत समुन्नतिं द्विषः ।सुजयः खलु तादृग् अन्तरे विपदन्ता ह्य् अविनीतसम्पदः ॥

2.53

लघुवृत्तितया भिदां गतं बहिर् अन्तश् च नृपस्य मण्डलम् ।अभिभूय हरत्य् अनन्तरः शिथिलं कूलम् इवापगारयः ॥

2.54

अनुशासतम् इत्य् अनाकुलं नयवर्त्माकुलम् अर्जुनाग्रजम् ।स्वयम् अर्थ इवाभिवाञ्छितस् तम् अभीयाय पराशरात्मजः ॥

2.55

मधुरैर् अवशानि लम्भयन्न् अपि तिर्यञ्चि शमं निरीक्षितैः ।परितः पटु बिभ्रद् एनसां दहनं धाम विलोकनक्षमम् ॥

2.56

सहसोपगतः सविस्मयं तपसां सूतिर् असूतिर् एनसाम् ।ददृशे जगतीभुजा मुनिः स वपुष्मान् इव पुण्यसंचयः ॥

2.57

अथोच्चकैर् आसनतः परार्ध्याद् उद्यन् स धूतारुणवल्कलाग्रः ।रराज कीर्णाकपिशांशुजालः शृङ्गात् सुमेरोर् इव तिग्मरश्मिः ॥

2.58

अवहितहृदयो विधाय स अर्हाम् ऋषिवद् ऋषिप्रवरे गुरूपदिष्टाम् ।तदनुमतम् अलंचकार पश्चात् प्रशम इव श्रुतम् आसनं नरेन्द्रः ॥

2.59

व्यक्तोदितस्मितमयूखविभासितोष्ठस् तिष्ठन् मुनेर् अभिमुखं स विकीर्णधाम्नः ।तन्वन्तम् इद्धम् अभितो गुरुम् अंशुजालं लक्ष्मीम् उवाह सकलस्य शशाङ्कमूर्तेः ॥

3.1

ततः शरच्चन्द्रकराभिरामैर् उत्सर्पिभिः प्रांशुम् इवांशुजालैः ।बिभ्राणम् आनीलरुचं पिशङ्गीर् जटास् तडित्वन्तम् इवाम्बुवाहम् ॥

3.2

प्रसादलक्ष्मीं दधतं समग्रां वपुःप्रकर्षेण जनातिगेन ।प्रसह्य चेतःसु समासजन्तम् असंस्तुतानाम् अपि भावम् आर्द्रम् ॥

3.3

अनुद्धताकारतया विविक्तां तन्वन्तम् अन्तःकरणस्य वृत्तिम् ।माधुर्यविस्रम्भविशेषभाजा कृतोपसम्भाषम् इवेक्षितेन ॥

3.4

धर्मात्मजो धर्मनिबन्धिनीनां प्रसूतिम् एनःप्रणुदां श्रुतीनाम् ।हेतुं तदभ्यागमने परीप्सुः सुखोपविष्टं मुनिम् आबभाषे ॥

3.5

अनाप्तपुण्योपचरैर् दुरापा फलस्य निर्धूतरजाः सवित्री ।तुल्या भवद्दर्शनसम्पद् एषा वृष्टेर् दिवो वीतबलाहकायाः ॥

3.6

अद्य क्रियाः कामदुघाः क्रतूनां सत्याशिषः सम्प्रति भूमिदेवाः ।आ संसृतेर् अस्मि जगत्सु जातस् त्वय्य् आगते यद् बहुमानपात्रम् ॥

3.7

श्रियं विकर्षत्य् अपहन्त्य् अघानि श्रेयः परिस्नौति तनोति कीर्तिम् ।संदर्शनं लोकगुरोर् अमोघम् अमोघं तवात्मयोनेर् इव किं न धत्ते ॥

3.8

श्च्योतन्मयूखे ऽपि हिमद्युतौ मे ननिर्वृतं निर्वृतिम् एति चक्षुः ।समुज्झितज्ञातिवियोगखेदं त्वत्संनिधाव् उच्छ्वसतीव चेतः ॥

3.9

निरास्पदं प्रश्नकुतूहलित्वम् अस्मास्व् अधीनं किम् उ निःस्पृहाणाम् ।तथापि कल्याणकरीं गिरं ते मां श्रोतुम् इच्छा मुखरीकरोति ॥

3.10

इत्य् उक्तवान् उक्तिविशेषरम्यं मनः समाधाय जयोपपत्तौ ।उदारचेता गिरम् इत्य् उदारां द्वैपायनेनाभिदधे नरेन्द्रः ॥

3.11

चिचीषतां जन्मवताम् अलघ्वीं यशोवतंसाम् उभयत्र भूतिम् ।अभ्यर्हिता बन्धुषु तुल्यरूपा वृत्तिर् विशेषेण तपोधनानाम् ॥

3.12

तथापि निघ्नं नृप तावकीनैः प्रह्वीकृतं मे हृदयं गुणौघैः ।वीतस्पृहाणाम् अपि मुक्तिभाजां भवन्ति भव्येषु हि पक्षपाताः ॥

3.13

सुता न यूयं किम् उ तस्य राज्ञः सुयोधनं वा न गुणैर् अतीताः ।यस् त्यक्तवान् वः स वृथा बलाद् वा मोहं विधत्ते विषयाभिलाषः ॥

3.14

जहातु नैनं कथम् अर्थसिद्धिः संशय्य कर्णादिषु तिष्ठते यः ।असाद्युयोगा हि जयान्तरायाः प्रमाथिनीनां विपदां पदानि ॥

3.15

पथश् च्युतायां समितौ रिपूणां धर्म्यां दधानेन धुरं चिराय ।त्वया विपत्स्व् अप्य् अविपत्ति रम्यम् आविष्कृतं प्रेम परं गुणेषु ॥

3.16

विधाय विध्वंसनम् आत्मनीनं शमैकवृत्तेर् भवतश् छलेन ।प्रकाशितत्वन्मतिशीलसाराः कृतोपकारा इव विद्विषस् ते ॥

3.17

लभ्या धरित्री तव विक्रमेण ज्यायांश् च वीर्यास्त्रबलैर् विपक्षः ।अतः प्रकर्षाय विधिर् विधेयः प्रकर्षतन्त्रा हि रणे जयश्रीः ॥

3.18

त्रिःसप्तकृत्वो जगतीपतीनां हन्ता गुरुर् यस्य स जामदग्न्यः ।वीर्यावधूतः स्म तदा विवेद प्रकर्षम् आधारवशं गुणानाम् ॥

3.19

यस्मिन्न् अनैश्वर्यकृतव्यलीकः पराभवं प्राप्त इवान्तको ऽपि ।धुन्वन् धनुः कस्य रणे न कुर्यान् मनो भयैकप्रवणं स भीष्मः ॥

3.20

सृजन्तम् आजाविषुसंहतीर् वः सहेत कोपज्वलितं गुरुं कः ।परिस्फुरल्लोलशिखाग्रजिह्वं जगज् जिघत्सन्तम् इवान्तवह्निम् ॥

3.21

निरीक्ष्य संरम्भनिरस्तधैर्यं राधेयम् आराधितजामदग्न्यम् ।असंस्तुतेषु प्रसभं भयेषु जायेत मृत्योर् अपि पक्षपातः ॥

3.22

यया समासादितसाधनेन सुदुश्चराम् आचरता तपस्याम् ।एते दुरापं समवाप्य वीर्यम् उन्मीलितारः कपिकेतनेन ॥

3.23

महत्त्वयोगाय महामहिम्नाम् आराधनीं तां नृप देवतानाम् ।दातुं प्रदानोचित भूरिधाम्नीम् उपागतः सिद्धिम् इवास्मि विद्याम् ॥

3.24

इत्य् उक्तवन्तं व्रज साधयेति प्रमाणयन् वाक्यम् अजातशत्रोः ।प्रसेदिवांसं तम् उपाससाद वसन्न् इवान्ते विनयेन जिष्णुः ॥

3.25

निर्याय विद्या+थ दिनादिरम्याद् बिम्बाद् इवार्कस्य मुखान् महर्षेः ।पार्थाननं वह्निकणावदाता दीप्तिः स्फुरत्पद्मम् इवाभिपेदे ॥

3.26

योगं च तं योग्यतमाय तस्मै तपःप्रभावाद् विततार सद्यः ।येनास्य तत्त्वेषु कृते ऽवभासे समुन्मिमीलेव चिराय चक्षुः ॥

3.27

आकारम् आशंसितभूरिलाभं दधानम् अन्तःकरणानुरूपम् ।नियोजयिष्यन् विजयोदये तं तपःसमाधौ मुनिर् इत्य् उवाच ॥

3.28

अनेन योगेन विवृद्धतेजा निजां परस्मै पदवीम् अयच्छन् ।समाचराचारम् उपात्तशस्त्रो जपोपवासाभिषवैर् मुनीनाम् ॥

3.29

करिष्यसे यत्र सुदुश्चराणि प्रसत्तये गोत्रभिदस् तपांसि ।शिलोच्चयं चारुशिलोच्चयं तम् एष क्षणान् नेष्यति गुह्यकस् त्वाम् ॥

3.30

इति ब्रुवाणेन महेन्द्रसूनुं महर्षिणा तेन तिरोबभूवे ।तं राजराजानुचरो ऽस्य साक्षात् प्रदेशम् आदेशम् इवाधितस्थौ ॥

3.31

कृतानतिर् व्याहृतसान्त्ववादे जातस्पृहः पुण्यजनः स जिष्णौ ।इयाय सख्याव् इव सम्प्रसादं विश्वासयत्य् आशु सतां हि योगः ॥

3.32

अथोष्णभासेव सुमेरुकुञ्जान् विहीयमानान् उदयाय तेन ।बृहद्द्युतीन् दुःखकृतात्मलाभं तमः शनैः पाण्डुसुतान् प्रपेदे ॥

3.33

असंशयालोचितकार्यनुन्नः प्रेम्णा समानीय विभज्यमानः ।तुल्याद् विभागाद् इव तन्मनोभिर् दुःखातिभारो ऽपि लघुः स मेने ॥

3.34

धैर्येण विश्वास्यतया महर्षेस् तीव्राद् अरातिप्रभवाच् च मन्योः ।वीर्यं च विद्वत्सु सुते मघोनः स तेषु न स्थानम् अवाप शोकः ॥

3.35

तान् भूरिधाम्नश् चतुरो ऽपि दूरं विहाय यामान् इव वासरस्य ।एकौघभूतं तद् अशर्म कृष्णां विभावरीं ध्वान्तम् इव प्रपेदे ॥

3.36

तुषारलेखाकुलितोत्पलाभे पर्यश्रुणी मङ्गलभङ्गभीरुः ।अगूढभावापि विलोकने सा न लोचने मीलयितुं विषेहे ॥

3.37

अकृत्रिमप्रेमरसाभिरामं रामार्पितं दृष्टिविलोभि दृष्टम् ।मनःप्रसादाञ्जलिना निकामं जग्राह पाथेयम् इवेन्द्रसूनुः ॥

3.38

धैर्यावसादेन हृतप्रसादा वन्यद्विपेनेव निदाघसिन्धुः ।निरुद्धबाष्पोदयसन्नकण्ठम् उवाच कृच्छ्राद् इति राजपुत्री ॥

3.39

मग्नां द्विषच्छद्मनि पङ्कभूते सम्भवानां भूतिम् इवोद्धरिष्यन् ।आधिद्विषाम् आ तपसां प्रसिद्धेर् अस्मद् विना मा भृशम् उन्मनीभूः ॥

3.40

यशो ऽधिगन्तुं सुखलिप्सया वा मनुष्यसंख्याम् अतिवर्तितुं वा ।निरुत्सुकानाम् अभियोगभाजां समुत्सुकेवाङ्कम् उपैति सिद्धिः ॥

3.41

लोकं विधात्रा विहितस्य गोप्तुं क्षत्त्रस्य मुष्णन् वसु जैत्रम् ओजः ।तेजस्विताया विजयैकवृत्तेर् निघ्नन् प्रियं प्राणम् इवाभिमानम् ॥

3.42

व्रीडानतैर् आप्तजनोपनीतः संशय्य कृच्छ्रेण नृपैः प्रपन्नः ।वितानभूतं विततं पृथिव्यां यशः समूहन्न् इव दिग्विकीर्णम् ॥

3.43

वीर्यावदानेषु कृतावमर्षस् तन्वन्न् अभूताम् इव सम्प्रतीतिम् ।कुर्वन् प्रयामक्षयम् आयतीनाम् अर्कत्विषाम् अह्न इवावशेषः ॥

3.44

प्रसह्य यो ऽस्मासु परैः प्रयुक्तः स्मर्तुं न शक्यः किम् उताधिकर्तुम् ।नवीकरिष्यत्य् उपशुष्यद् आर्द्रः स त्वद् विना मे हृदयं निकारः ॥

3.45

प्राप्तो ऽभिमानव्यसनाद् असह्यं दन्तीव दन्तव्यसनाद् विकारम् ।द्विषत्प्रतापान्तरितोरुतेजाः शरद्घनाकीर्ण इवादिर् अह्नः ॥

3.46

सव्रीडमन्दैर् इव निष्क्रियत्वान् नात्यर्थम् अस्त्रैर् अवभासमानः ।यशःक्षयक्षीणजलार्णवाभस् त्वम् अन्यम् आकारम् इवाभिपन्नः ॥

3.47

दुःशासनामर्षरजोविकीर्णैर् एभिर् विनाथैर् इव भाग्यनाथैः ।केशैः कदर्थीकृतवीर्यसारः कच्चित् स एवासि धनंजयस् त्वम् ॥

3.48

स क्षत्रियस् त्राणसहः सतां यस् तत् कार्मुकं कर्मसु यस्य शक्तिः ।वहन् द्वयीं यद्य् अफले ऽर्थजाते करोत्य् असंस्कारहताम् इवोक्तिम् ॥

3.49

वीतौजसः सन्निधिमात्रशेषा भवत्कृतां भूतिम् अपेक्षमाणाः ।समानदुःखा इव नस् त्वदीयाः सरूपतां पार्थ गुणा भजन्ते ॥

3.50

आक्षिप्यमाणं रिपुभिः प्रमादान् नागैर् इवालूनसटं मृगेन्द्रम् ।त्वां धूर् इयं योग्यतयाधिरूढा दीप्त्या दिनश्रीर् इव तिग्मरश्मिम् ॥

3.51

करोति यो ऽशेषजनातिरिक्तां सम्भावनाम् अर्थवतीं क्रियाभिः ।संसत्सु जाते पुरुषाधिकारे न पूरणी तं समुपैति संख्या ॥

3.52

प्रियेषु यैः पार्थ विनोपपत्तेर् विचिन्त्यमानैः क्लमम् एति चेतः ।तव प्रयातस्य जयाय तेषां क्रियाद् अघानां मघवा विघातम् ॥

3.53

मा गाश् चिरायैकचरः प्रमादं वसन्न् असम्बाधशिवे ऽपि देशे ।मात्सर्यरागोपहतात्मनां हि स्खलन्ति साधुष्व् अपि मानसानि ॥

3.54

तद् आशु कुर्वन् वचनं महर्षेर् मनोरथान् नः सफलीकुरुष्व ।प्रत्यागतं त्वास्मि कृतार्थम् एव स्तनोपपीडं परिरब्धुकामा ॥

3.55

उदीरितां ताम् इति याज्ञसेन्या नवीकृतोद्ग्राहितविप्रकाराम् ।आसाद्य वाचं स भृशं दिदीपे काष्ठाम् उदीचीम् इव तिग्मरश्मिः ॥

3.56

अथाभिपश्यन्न् इव विद्विषः पुरः पुरोधसारोपितहेतिसंहतिः ।बभार रम्यो ऽपि वपुः स भीषणं गतः क्रियां मन्त्र इवाभिचारिकीम् ॥

3.57

अविलङ्घ्यविकर्षणं परैः प्रथितज्यारवकर्म कार्मुकम् ।अगताव् अरिदृष्टिगोचरं शितनिस्त्रिंशयुजौ महेषुधी ॥

3.58

यशसेव तिरोदधन् मुहुर् महसा गोत्रभिदायुधक्षतीः ।कवचं च सरत्नम् उद्वहञ् ज्वलितज्योतिर् इवान्तरं दिवः ॥

3.59

अकलाधिपभृत्यदर्शितं शिवम् उर्वीधरवर्त्म सम्प्रयान् ।हृदयानि समाविवेश स क्षणम् उद्बाष्पदृशां तपोभृताम् ॥

3.60

अनुजगुर् अथ दिव्यं दुन्दुभिध्वानम् आशाः+ सुरकुसुमनिपातैर् व्योम्नि लक्ष्मीर् वितेने ।प्रियम् इव कथयिष्यन्न् आलिलिङ्ग स्फुरन्तीं भुवम् अनिभृतवेलावीचिबाहुः पयोधिः ॥

4.1

ततः स कूजत्कलहंसमेखलां सपाकसस्याहितपाण्डुतागुणाम् ।उपाससादोपजनं जनप्रियः प्रियाम् इवासादितयौवनां भुवम् ॥

4.2

विनम्रशालिप्रसवौघशालिनीर् अपेतपङ्काः ससरोरुहाम्भसः ।ननन्द पश्यन्न् उपसीम स स्थलीर् उपायनीभूतशरद्गुणश्रियः ॥

4.3

निरीक्ष्यमाणा इव विस्मयाकुलैः पयोभिर् उन्मीलितपद्मलोचनैः ।हृतप्रियादृष्टिविलासविभ्रमा मनो ऽस्य जह्रुः शफरीविवृत्तयः ॥

4.4

तुतोष पश्यन् कलमस्य स अधिकं सवारिजे वारिणि रामणीयकम् ।सुदुर्लभे नार्हति को ऽभिनन्दितुं प्रकर्षलक्ष्मीम् अनुरूपसंगमे ॥

4.5

नुनोद तस्य स्थलपद्मिनीगतं वितर्कम् आविष्कृतफेनसंतति ।अवाप्तकिञ्जल्कविभेदम् उच्चकैर् विवृत्तपाठीनपराहतं पयः ॥

4.6

कृतोर्मिरेखं शिथिलत्वम् आयता शनैः शनैः शान्तरयेण वारिणा ।निरीक्ष्य रेमे स समुद्रयोषितां तरङ्गितक्षौमविपाण्डु सैकतम् ॥

4.7

मनोरमं प्रापितम् अन्तरं भ्रुवोर् अलंकृतं केसररेणुणाणुना ।अलक्तताम्राधरपल्लवश्रिया समानयन्तीम् इव बन्धुजीवकम् ॥

4.8

नवातपालोहितम् आहितं मुहुर् महानिवेशौ परितः पयोधरौ ।चकासयन्तीम् अरविन्दजं रजः परिश्रमाम्भःपुलकेन सर्पता ॥

4.9

कपोलसंश्लेषि विलोचनत्विषा विभूषयन्तीम् अवतंसकोत्पलम् ।सुतेन पाण्डोः कलमस्य गोपिकां निरीक्ष्य मेने शरदः कृतार्थता ॥

4.10

उपारताः पश्चिमरात्रिगोचराद् अपारयन्तः पतितुं जवेन गाम् ।तम् उत्सुकाश् चक्रुर् अवेक्षणोत्सुकं गवां गणाः प्रस्नुतपीवरौधरसः ॥

4.11

परीतम् उक्षावजये जयश्रिया नदन्तम् उच्चैः क्षतसिन्धुरोधसम् ।ददर्श पुष्टिं दधतं स शारदीं सविग्रहं दर्पम् इवाधिपं गवाम् ॥

4.12

विमुच्यमानैर् अपि तस्य मन्थरं गवां हिमानीविशदैः कदम्बकैः ।शरन्नदीनां पुलिनैः कुतूहलं गलद्दुकूलैर् जघनैर् इवादधे ॥

4.13

गतान् पशूनां सहजन्मबन्धुतां गृहाश्रयं प्रेम वनेषु बिभ्रतः ।ददर्श गोपान् उपधेनु पाण्डवः कृतानुकारान् इव गोभिर् आर्जवे ॥

4.14

परिभ्रमन् मूर्धजषट्पदाकुलैः स्मितोदयादर्शितदन्तकेसरैः ।मुखैश् चलत्कुण्डलरश्मिरञ्जितैर् नवातपामृष्टसरोजचारुभिः ॥

4.15

निबद्धनिःश्वासविकम्पिताधरा लता इव प्रस्फुरितैकपल्लवाः ।व्यपोढपार्श्वैर् अपवर्तितत्रिका विकर्षणैः पाणिविहारहारिभिः ॥

4.16

व्रजाजिरेष्व् अम्बुदनादशङ्किनीः शिखण्डिनाम् उन्मदयत्सु योषितः ।मुहुः प्रणुन्नेषु मथां विवर्तनैर् नदत्सु कुम्भेषु मृदङ्गमन्थरम् ॥

4.17

स मन्थरावल्गितपीवरस्तनीः परिश्रमक्लान्तविलोचनोत्पलाः ।निरीक्षितुं नोपरराम बल्लवीर् अभिप्रनृत्ता इव वारयोषितः ॥

4.18

पपात पूर्वां जहतो विजिह्मतां वृषोपभुक्तान्तिकसस्यसम्पदः ।रथाङ्गसीमन्तितसान्द्रकर्दमान् प्रसक्तसम्पातपृथक्कृतान् पथः ॥

4.19

जनैर् उपग्रामम् अनिन्द्यकर्मभिर् विविक्तभावेङ्गितभूषणैर् वृताः ।भृशं ददर्शाश्रममण्डपोपमाः सपुष्पहासाः स निवेशवीरुधः ॥

4.20

ततः स सम्प्रेक्ष्य शरद्गुणश्रियं शरद्गुणालोकनलोलचक्षुषम् ।उवाच यक्षस् तम् अचोदितो ऽपि गां न हीङ्गितज्ञो ऽवसरे ऽवसीदति ॥

4.21

इयं शिवाया नियतेर् इवायतिः कृतार्थयन्ती जगतः फलैः क्रियाः ।जयश्रियं पार्थ पृथूकरोतु ते शरत् प्रसन्नाम्बुर् अनम्बुवारिदा ॥

4.22

उपैति सस्यं परिणामरम्यता नदीर् अनौद्धत्यम् अपङ्कता महीम् ।नवैर् गुणैः सम्प्रति संस्तवस्थिरं तिरोहितं प्रेम घनागमश्रियः ॥

4.23

पतन्ति नास्मिन् विशदाः पतत्त्रिणो धृतेन्द्रचापा न पयोदपङ्क्तयः ।तथापि पुष्णाति नभः श्रियं परां न रम्यम् आहार्यम् अपेक्षते गुणम् ॥

4.24

विपाण्डुभिर् ग्लानतया पयोधरैश् च्युताचिराभागुणहेमदामभिः ।इयं कदम्बानिलभर्तुर् अत्यये न दिग्वधूनां कृशता न राजते ॥

4.25

विहाय वाञ्छाम् उदिते मदात्ययाद् अरक्तकण्ठस्य रुते शिखण्डिनः ।श्रुतिः श्रयत्य् उन्मदहंसनिःस्वनं गुणाः प्रियत्वे ऽधिकृता न संस्तवः ॥

4.26

अमी पृथुस्तम्भभृतः पिशङ्गतां गता विपाकेन फलस्य शालयः ।विकासि वप्राम्भसि गन्धसूचितं नमन्ति निघ्रातुम् इवासितोत्पलम् ॥

4.27

मृणालिनीनाम् अनुरञ्जितं त्विषा विभिन्नम् अम्भोजपलाशशोभया ।पयः स्फुरच्छालिशिखापिशङ्गितं द्रुतं धनुष्खण्डम् इवाहिविद्विषः ॥

4.28

विपाण्डु संव्यानम् इवानिलोद्धतं निरुन्धतीः सप्तपलाशजं रजः ।अनाविलोन्मीलितबाणचक्षुषः सपुष्पहासा वनराजियोषितः ॥

4.29

अदीपितं वैद्युतजातवेदसा सिताम्बुदच्छेदतिरोहितातपम् ।ततान्तरं सान्तरवारिशीकरैः शिवं नभोवर्त्म सरोजवायुभिः ॥

4.30

सितच्छदानाम् अपदिश्य धावतां रुतैर् अमीषां ग्रथिताः पतत्रिणाम् ।प्रकुर्वते वारिदरोधनिर्गताः परस्परालापम् इवामला दिशः ॥

4.31

विहारभूमेर् अभिघोषम् उत्सुकाः शरीरजेभ्यश् च्युतयूथपङ्क्तयः ।असक्तम् ऊधांसि पयः क्षरन्त्य् अमूर् उपायनानीव नयन्ति धेनवः ॥

4.32

जगत्प्रसूतिर् जगदेकपावनी व्रजोपकण्ठं तनयैर् उपेयुषी ।द्युतिं समग्रां समितिर् गवाम् असाव् उपैति मन्त्रैर् इव संहिताहुतिः ॥

4.33

कृतावधानं जितबर्हिणध्वनौ सुरक्तगोपीजनगीतनिःस्वने ।इदं जिघत्साम् अपहाय भूयसीं न सस्यम् अभ्येति मृगीकदम्बकम् ॥

4.34

असाव् अनास्थापरयावधीरितः सरोरुहिण्या शिरसा नमन्न् अपि ।उपैति शुष्यन् कलमः सहाम्भसा मनोभुवा तप्त इवाभिपाण्डुताम् ॥

4.35

अमी समुद्धूतसरोजरेणुना हृता हृतासारकणेन वायुना ।उपागमे दुश्चरिता इवापदां गतिं न निश्चेतुम् अलं शिलीमुखाः ॥

4.36

मुखैर् असौ विद्रुमभङ्गलोहितैः शिखाः पिशङ्गीः कलमस्य बिभ्रती ।शुकावलिर् व्यक्तशिरीषकोमला धनुःश्रियं गोत्रभिदो ऽनुगच्छति ॥

4.37

इति कथयति तत्र नातिदूराद् अथ ददृशे पिहितोष्णरश्मिबिम्बः ।विगलितजलभारशुक्लभासां निचय इवाम्बुमुचां नगाधिराजः ॥

4.38

तम् अतनुवनराजिश्यामितोपत्यकान्तं नगम् उपरि हिमानीगौरम् आसद्य जिष्णुः ।व्यपगतमदरागस्यानुसस्मार लक्ष्मीम् असितम् अधरवासो बिभ्रतः सीरपाणेः ॥

5.1

अथ जयाय नु मेरुमहीभृतो रभसया नु दिगन्तदिदृक्षया ।अभिययौ स हिमाचलम् उच्छ्रितं समुदितं नु विलङ्घयितुं नभः ॥

5.2

तपनमण्डलदीतितम् एकतः सततनैशतमोवृतम् अन्यतः ।हसितभिन्नतमिस्रचयं पुरः शिवम् इवानुगतं गजचर्मणा ॥

5.3

क्षितिनभःसुरलोकनिवासिभिः कृतनिकेतम् अदृष्टपरस्परैः ।प्रथयितुं विभुताम् अभिनिर्मितं प्रतिनिधिं जगताम् इव शम्भुना ॥

5.4

भुजगराजसितेन नभःश्रिया कनकराजिविराजितसानुना ।समुदितं निचयेन तडित्वतीं लघयता शरदम्बुदसंहतिम् ॥

5.5

मणिमयूखचयांशुकभासुराः सुरवधूपरिभुक्तलतागृहाः ।दधतम् उच्चशिलान्तरगोपुराः पुर इवोदितपुष्पवना भुवः ॥

5.6

अविरतोज्झितवारिविपाण्डुभिर् विरहितैर् अचिरद्युतितेजसा ।उदितपक्षम् इवारतनिःस्वनैः पृथुनितम्बविलम्बिभिर् अम्बुदैः ॥

5.7

दधतम् आकरिभिः करिभिः क्षतैः समवतारसमैर् असमैस् तटैः ।विविधकामहिता महिताम्भसः स्फुटसरोजवना जवना नदीः ॥

5.8

नवविनिद्रजपाकुसुमत्विषां द्युतिमतां निकरेण महाश्मनाम् ।विहितसांध्यमयूखम् इव क्वचिन् निचितकाञ्चनभित्तिषु सानुषु ॥

5.9

पृथुकदम्बकदम्बकराजितं ग्रहितमालतमालवनाकुलम् ।लघुतुषारतुषारजलश्च्युतं धृतसदानसदाननदन्तिनम् ॥

5.10

रहितरत्नचयान् न शिलोच्चयान् अफलताभवना न दरीभुवः ।विपुलिनाम्बुरुहा न सरिद्वधूर् अकुसुमान् दधतं न महीरुहः ॥

5.11

व्यथितसिन्धुम् अनीरशनैः शनैर् अमरलोकवधूजघनैर् घनैः ।फणभृताम् अभितो विततं ततं दयितरम्यलताबकुलैः कुलैः ॥

5.12

ससुरचापम् अनेकमणिप्रभैर् अपपयोविशदं हिमपाण्डुभिः ।अविचलं शिखरैर् उपबिभ्रतं ध्वनितसूचितम् अम्बुमुचां चयम् ॥

5.13

विकचवारिरुहं दधतं सरः सकलहंसगणं शुचि मानसम् ।शिवम् अगात्मजया च कृतेर्ष्यया सकलहं सगणं शुचिमानसम् ॥

5.14

ग्रहविमानगणान् अभितो दिवं ज्वलयतौषधिजेन कृशानुना ।मुहुर् अनुस्मरयन्तम् अनुक्षपं त्रिपुरदाहम् उपापतिसेविनः ॥

5.15

विततशीकरराशिभिर् उच्छ्रितैर् उपलरोधविवर्तिभिर् अम्बुभिः ।दधतम् उन्नतसानुसमुद्धतां धृतसितव्यजनाम् इव जाह्नवीम् ॥

5.16

अनुचरेण धनाधिपतेर् अथो नगविलोकनविस्मितमानसः ।स जगदे वचनं प्रियम् आदरान् मुखरतावसरे हि विराजते ॥

5.17

अलम् एष विलोकितः प्रजानां सहसा संहतिम् अंहसां विहन्तुम् ।घनवर्त्म सहस्रधेव कुर्वन् हिमगौरैर् अचलाधिपः शिरोभिः ॥

5.18

इह दुरधिगमैः किंचिद् एवागमैः सततम् असुतरं वर्णयन्त्य् अन्तरम् ।अमुम् अतिविपिनं वेद दिग्व्यापिनं पुरुषम् इव परं पद्मयोनिः परम् ॥

5.19

रुचिरपल्लवपुष्पलतागृहैर् उपलसज्जलजैर् जलराशिभिः ।नयति संततम् उत्सुकताम् अयं धृतिमतीर् उपकान्तम् अपि स्त्रियः ॥

5.20

सुलभैः सदा नयवतायवता निधिगुह्यकाधिपरमैः परमैः ।अमुना धनैः क्षितिभृतातिभृता समतीत्य भाति जगती जगती ॥

5.21

अखिलम् इदम् अमुष्य गैरीगुरोस् त्रिभुवनम् अपि नैति मन्ये तुलाम् ।अधिवसति सदा यद् एनं जनैर् अविदितविभवो भवानीपतिः ॥

5.22

वीतजन्मजरसं परं शुचि ब्रह्मणः पदम् उपैतुम् इच्छताम् ।आगमाद् इव तमोपहाद् इतः सम्भवन्ति मतयो भवच्छिदः ॥

5.23

दिव्यस्त्रीणां सचरणलाक्षारागा रागायाते निपतितपुष्पापीडाः ।पीडाभाजः कुसुमचिताः साशंसं शंसन्त्य् अस्मिन् सुरतविशेषं शय्याः ॥

5.24

गुणसम्पदा समधिगम्य परं महिमानम् अत्र महिते जगताम् ।नयशालिनि श्रिय इवाधिपतौ विरमन्ति न ज्वलितुम् औषधयः ॥

5.25

कुररीगणः कृतरवस् तरवः कुसुमानताः सकमलं कमलम् ।इह सिन्धवश् च वरणावरणाः करिणां मुदे सनलदानलदाः ॥

5.26

सादृश्यं गतम् अपनिद्रचूतगन्धैर् आमोदं मदजलसेकजं दधानः ।एतस्मिन् मदयति कोकिलान् अकाले लीनालिः सुरकरिणां कपोलकाषः ॥

5.27

सनाकवनितं नितम्बरुचिरं चिरं सुनिनदैर् नदैर् वृतम् अमुम् ।मता फलवतो ऽवतो रसपरा परास्तवसुधा सुधाधिवसति ॥

5.28

श्रीमल्लताभवनम् ओषधयः प्रदीपाः शय्या नवानि हरिचन्दनपल्लवानि ।अस्मिन् रतिश्रमनुदश् च सरोजवाताः स्मर्तुं दिशन्ति न दिवः सुरसुन्दरीभ्यः ॥

5.29

ईशार्थम् अम्भसि चिराय तपश् चरन्त्या यादोविलङ्घनविलोलविलोचनायाः ।आलम्बताग्रकरम् अत्र भवो भवान्याः श्च्योतन्निदाघसलिलाङ्गुलिना करेण ॥

5.30

येनापविद्धसलिलः स्फुटनागसद्मा देवासुरैर् अमृतम् अम्बुनिधिर् ममन्थे ।व्यावर्तनैर् अहिपतेर् अयम् आहिताङ्कः खं व्यालिखन्न् इव विभाति स मन्दराद्रिः ॥

5.31

नीतोच्छ्रायं मुहुर् अशिशिररश्मेर् उस्रैर् आनीलाभैर् विरचितपरभागा रत्नैः ।ज्योत्स्नाशङ्काम् इव वितरति हंसश्येनी मध्ये ऽप्य् अह्नः स्फटिकरजतभित्तिच्छाया ॥

5.32

दधत इव विलासशालि नृत्यं मृदु पतता पवनेन कम्पितानि ।इह ललितविलासिनीजनभ्रूगतिकुटिलेषु पयःसु पङ्कजानि ॥

5.33

अस्मिन्न् अगृह्यत पिनाकभृता सलीलम् आबद्धवेपथुर् अधीरविलोचनायाः ।विन्यस्तमङ्गलमहौषधिर् ईश्वरायाः स्रस्तोरगप्रतिसरेण करेण पाणिः ॥

5.34

क्रामद्भिर् घनपदवीम् अनेकसंख्यैस् तेजोभिः शुचिमणिजन्मभिर् विभिन्नः ।उस्राणां व्यभिचरतीव सप्तसप्तेः पर्यस्यन्न् इह निचयः सहस्रसंख्याम् ॥

5.35

व्यधत्त यस्मिन् पुरम् उच्चगोपुरं पुरां विजेतुर् धृतये धनाधिपः ।स एष कैलास उपान्तसर्पिणः करोत्य् अकालास्तमयं विवस्वतः ॥

5.36

नानारत्नज्योतिषां संनिपातैश् छन्नेष्व् अन्तःसानु वप्रान्तरेषु ।बद्धां बद्धां भित्तिशङ्काम् अमुष्मिन् नावानावान् मातरिश्वा निहन्ति ॥

5.37

रम्या नवद्युतिर् अपैति न शाद्वलेभ्यः श्यामीभवन्त्य् अनुदिनं नलिनीवनानि ।अस्मिन् विचित्रकुसुमस्तबकाचितानां शाखाभृतां परिणमन्ति न पल्लवानि ॥

5.38

परिसरविषयेषु लीढमुक्ता हरिततृणोद्गमशङ्कया मृगीभिः ।इह नवशुककोमला मणीनां रविकरसंवलिताः फलन्ति भासः ॥

5.39

उत्फुल्लस्थलनलिनीवनाद् अमुष्माद् उद्धूतः सरसिजसम्भवः परागः ।वात्याभिर् वियति विवर्तितः समन्ताद् आधत्ते कनकमयातपत्रलक्ष्मीम् ॥

5.40

इह सनियमयोः सुरापगायाम् उषसि सयावकसव्यपादरेखा ।कथयति शिवयोः शरीरयोगं विषमपदा पदवी विवर्तनेषु ॥

5.41

संमूर्छतां रजतभित्तिमयूखजालैर् आलोकपादपलतान्तरनिर्गतानाम् ।घर्मद्युतेर् इह मुहुः पटलानि धाम्नाम् आदर्शमण्डलनिभानि समुल्लसन्ति ॥

5.42

शुक्लैर् मयूखनिचयैः परिवीतमूर्तिर् वप्राभिघातपरिमण्डलितोरुदेहः ।शृङ्गाण्य् अमुष्य भजते गणभर्तुर् उक्षा कुर्वन् वधूजनमनःसु शशाङ्कशङ्काम् ॥

5.43

सम्प्रति लब्धजन्म शनकैः कथम् अपि लघुनि क्षीणपयस्य् उपेयुषि भिदां जलधरपटले ।खण्डितविग्रहं बलभिदो धनुर् इह विविधाः पूरयितुं भवन्ति विभवः शिखरमणिरुचः ॥

5.44

स्नपितनवलतातरुप्रवालैर् अमृतलवस्रुतिशालिभिर् मयूखैः ।सततम् असितयामिनीषु शम्भो अमलयतीह वनान्तम् इन्दुलेखा ॥

5.45

क्षिपति यो ऽनुवनं विततां बृहद् बृहतिकाम् इव रौचनिकीं रुचम् ।अयम् अनेकहिरण्मयकंदरस् तव पितुर् दयितो जगतीधरः ॥

5.46

सक्तिं लवाद् अपनयत्य् अनिले लतानां वैरोचनैर् द्विगुणिताः सहसा मयूखैः ।रोधोभुवां मुहुर् अमुत्र हिरण्मयीनां भासस् तडिद्विलसितानि विडम्बयन्ति ॥

5.47

कषणकम्पनिरस्तमहाहिभिः क्षणविमत्तमतङ्गजवर्जितैः ।इह मदस्नपितैर् अनुमीयते सुरगजस्य गतं हरिचन्दनैः ॥

5.48

जलदजालघनैर् असिताश्मनाम् उपहतप्रचयेह मरीचिभिः ।भवति दीप्तिर् अदीपितकंदरा तिमिरसंवलितेव विवस्वतः ॥

5.49

भव्यो भवन्न् अपि मुनेर् इह शासनेन क्षात्रे स्थितः पथि तपस्य हतप्रमादः ।प्रायेण सत्य् अपि हितार्थकरे विधौ हि श्रेयांसि लब्धुम् असुखानि विनान्तरायैः ॥

5.50

मा भूवन्न् अपथहृतस् तवेन्द्रियाश्वाः संतापे दिशतु शिवः शिवां प्रसक्तिम् ।रक्षन्तस् तपसि बलं च लोकपालाः कल्याणीम् अधिकफलां क्रियां क्रियायुः ॥

5.51

इत्य् उक्त्वा सपदि हितं प्रियं प्रियार्हे धाम स्वं गतवति राजराजभृत्ये ।सोत्कण्ठं किम् अपि पृथासुतः प्रदध्यौ संधत्ते भृशम् अरतिं हि सद्वियोगः ॥

5.52

तम् अनतिशयनीयं सर्वतः सारयोगाद् अविरहितम् अनेकेनाङ्कभाजा फलेन ।अकृशम् अकृशलक्ष्मीश् चेतसाशंसितं स स्वम् इव पुरुषकारं शैलम् अभ्याससाद ॥

6.1

रुचिराकृतिः कनकसानुम् अथो परमः पुमान् इव पतिं पतताम् ।धृतसत्पथस् त्रिपथगाम् अभितः स तम् आरुरोह पुरुहूतसुतः ॥

6.2

तम् अनिन्द्यबन्दिन इवेन्द्रसुतं विहितालिनिक्वणजयध्वनयः ।पवनेरिताकुलविजिह्मशिखा जगतीरुहो ऽवचकरुः कुसुमैः ॥

6.3

अवधूतपङ्कजपरागकणास् तनुजाह्नवीसलिलवीचिभिदः ।परिरेभिरे ऽभिमुखम् एत्य सुखाः सुहृदः सखायम् इव तं मरुतः ॥

6.4

उदितोपलस्खलनसंवलिताः स्फुटहंससारसविरावयुजः ।मुदम् अस्य माङ्गलिकतूर्यकृतां ध्वनयः प्रतेनुर् अनुवप्रम् अपाम् ॥

6.5

अवरुग्णतुङ्गसुरदारुतरौ निचये पुरः सुरसरित्पयसाम् ।स ददर्श वेतसवनाचरितां प्रणतिं बलीयसि समृद्धिकरीम् ॥

6.6

प्रबभूव नालम् अवलोकयितुं परितः सरोजरजसारुणितम् ।सरिदुत्तरीयम् इव संहतिमत् स तरङ्गरङ्गि कलहंसकुलम् ॥

6.7

दधति क्षतीः परिणतद्विरदे मुदितालियोषिति मदस्रुतिभिः ।अधिकां स रोधसि बबन्ध धृतिं महते रुजन्न् अपि गुणाय महान् ॥

6.8

अनुहेमवप्रम् अरुणैः समतां गतम् ऊर्मिभिः सहचरं पृथुभिः ।स रथाङ्गनामवनितां करुणैर् अनुबध्नतीम् अभिननन्द रुतैः ॥

6.9

सितवाजिने निजगदू रुचयश् चलवीचिरागरचनापटवः ।मणिजालम् अम्भसि निमग्नम् अपि स्फुरितं मनोगतम् इवाकृतयः ॥

6.10

उपलाहतोद्धततरङ्गधृतं जविना विधूतविततं मरुता ।स ददर्श केतकशिखाविशदं सरितः प्रहासम् इव फेनम् अपाम् ॥

6.11

बहु बर्हिचन्द्रिकनिभं विदधे धृतिम् अस्य दानपयसां पटलम् ।अवगाढम् ईक्षितुम् इवैभपतिं विकसद्विलोचनशतं सरितः ॥

6.12

प्रतिबोधजृम्भणविभीनमुखी पुलिने सरोरुहदृशा ददृशे ।पतदच्छमौक्तिकमणिप्रकरा गलदश्रुबिन्दुर् इव शुक्तिवधूः ॥

6.13

शुचिर् अप्सु विद्रुमलताविटपस् तनुसान्द्रफेनलवसंवलितः ।स्मरदायिनः स्मरयति स्म भृशं दयिताधरस्य दशनांशुभृतः ॥

6.14

उपलभ्य चञ्चलतरङ्गहृतं मदगन्धम् उत्थितवतां पयसः ।प्रतिदन्तिनाम् इव स सम्बुबुधे करियादसाम् अभिमुखान् करिणः ॥

6.15

स जगाम विस्मयम् उद्वीक्ष्य पुरः सहसा समुत्पिपतिषोः फणिनः ।प्रहितं दिवि प्रजविभिः श्वसितैः शरदभ्रविभ्रमम् अपां पटलम् ॥

6.16

स ततार सैकतवतीर् अभितः शफरीपरिस्फुरितचारुदृशः ।ललिताः सखीर् इव बृहज्जघनाः सुरनिम्नगाम् उपयतीः सरितः ॥

6.17

अधिरुह्य पुष्पभरनम्रशिखैः परितः परिष्कृततलां तरुभिः ।मनसः प्रसत्तिम् इव मूर्ध्नि गिरेः शुचिम् आससाद स वनान्तभुवम् ॥

6.18

अनुसानु पुष्पितलताविततिः फलितोरुभूरुहविविक्तवनः ।धृतिम् आततान तनयस्य हरेस् तपसे ऽधिवस्तुम् अचलाम् अचलः ॥

6.19

प्रणिधाय तत्र विधिनाथ धियं दधतः पुरातनमुनेर् मुनिताम् ।श्रमम् आदधाव् असुकरं न तपः किम् इवावसादकरम् आत्मवताम् ॥

6.20

शमयन् धृतेन्द्रियशमैकसुखः शुचिभिर् गुणैर् अघमयं स तमः ।प्रतिवासरं सुकृतिभिर् ववृधे विमलः कलाभिर् इव शीतरुचिः ॥

6.21

अधरीचकार च विवेकगुणाद् अगुणेषु तस्य धियम् अस्तवतः ।प्रतिघातिनीं विषयसङ्गरतिं निरुपप्लवः शमसुखानुभवः ॥

6.22

मनसा जपैः प्रणतिभिः प्रयतः समुपेयिवान् अधिपतिं स दिवः ।सहजेतरे जयशमौ दधती बिभरांबभूव युगपन् महसी ॥

6.23

शिरसा हरिन्मणिनिभः स वहन् कृतजन्मनो ऽभिषवणेन जटाः ।उपमां ययाव् अरुणदीधितिभिः परिमृष्टमूर्धनि तमालतरौ ॥

6.24

धृतहेतिर् अप्य् अधृतजिह्ममतिश् चरितैर् मुनीन् अधरयञ् शुचिभिः ।रजयांचकार विरजाः स मृगान् कम् इवेशते रमयितुं न गुणाः ॥

6.25

अनुकूलपातिनम् अचण्डगतिं किरता सुगन्धिम् अभितः पवनम् ।अवधीरितार्तवगुणं सुखतां नयता रुचां निचयम् अंशुमतः ॥

6.26

नवपल्लवाञ्जलिभृतः प्रचये बृहतस् तरून् गमयतावनतिम् ।स्तृणता तृणैः प्रतिनिशं मृदुभिः शयनीयताम् उपयतीं वसुधाम् ॥

6.27

पतितैर् अपेतजलदान् नभसः पृषतैर् अपां शमयता च रजः ।स दयालुनेव परिगाढकृशः परिचर्ययानुजगृहे तपसा ॥

6.28

महते फलाय तद् अवेक्ष्य शिवं विकसन्निमित्तकुसुमं स पुरः ।न जगाम विस्मयवशं वशिनां न निहन्ति धैर्यम् अनुभावगुणः ॥

6.29

तद् अभूरिवासरकृतं सुकृतैर् उपलभ्य वैभवम् अनन्यभवम् ।उपतस्थुर् आस्थितविषादधियः शतयज्वनो वनचरा वसतिम् ॥

6.30

विदिताः प्रविश्य विहितानतयः शिथिलीकृते ऽधिकृतकृत्यविधौ ।अनपेतकालम् अभिरामकथाः कथयांबभूवुर् इति गोत्रभिदे ॥

6.31

शुचिवल्कवीततनुर् अन्यतमस् तिमिरच्छिदाम् इव गिरौ भवतः ।महते जयाय मघवन्न् अनघः पुरुषस् तपस्यति तपज् जगतीम् ॥

6.32

स बिभर्ति भीषणभुजंगभुजः पृथि विद्विषां भयविधायि धनुः ।अमलेन तस्य धृतसच्चरिताश् चरितेन चातिशयिता मुनयः ॥

6.33

मरुतः शिवा नवतृणा जगती विमलं नभो रजसि वृष्टिर् अपाम् ।गुणसम्पदानुगुणतां गमितः कुरुते ऽस्य भक्तिम् इव भूतगणः ॥

6.34

इतरेतरानभिभवेन मृगास् तम् उपासते गुरुम् इवान्तसदः ।विनमन्ति चास्य तरवः प्रचये परवान् स तेन भवतेव नगः ॥

6.35

उरु सत्त्वम् आह विपरिश्रमता परमं वपुः प्रथयतीव जयम् ।शमिनो ऽपि तस्य नवसंगमने विभुतानुषङ्गि भयम् एति जनः ॥

6.36

ऋषिवंशजः स यदि दैत्यकुले यदि वान्वये महति भूमिभृताम् ।चरतस् तपस् तव वनेषु सदा न वयं निरूपयितुम् अस्य गतिम् ॥

6.37

विगणय्य कारणम् अनेकगुणं निजयाथवा कथितम् अल्पतया ।असद् अप्य् अदः सहितुम् अर्हति नः क्व वनेचराः क्व निपुणा मतयः ॥

6.38

अधिगम्य गुह्यकगणाद् इति तन् मनसः प्रियं प्रियसुतस्य तपः ।निजुगोप हर्षम् उदितं मघवा नयवर्त्मगाः प्रभवतां हि धियः ॥

6.39

प्रणिधाय चित्तम् अथ भक्ततया विदिते ऽप्य् अपूर्व इव तत्र हरिः ।उपलब्धुम् अस्य नियमस्थिरतां सुरसुन्दरीर् इति वचो ऽभिदधे ॥

6.40

सुकुमारम् एकम् अणु मर्मभिदाम् अतिदूरगं युतम् अमोघतया ।अविपक्षम् अस्त्रम् अपरं कतमद् विजयाय यूयम् इव चित्तभुवः ॥

6.41

भववीतये हतबृहत्तमसाम् अवबोधवारि रजसः शमनम् ।परिपीयमाणम् इव वो ऽसकलैर् अवसादम् एति नयनाञ्जलिभिः ॥

6.42

बहुधा गतां जगति भूतसृजा कमनीयतां समभिहृत्य पुरा ।उपपादिता विदधता भवतीः सुरसद्मयानसुमुखी जनता ॥

6.43

तद् उपेत्य विघ्नयत तस्य तपः कृतिभिः कलासु सहिताः सचिवैः ।हृतवीतरागमनसां ननु वः सुखसङ्गिनं प्रति सुखावजितिः ॥

6.44

अविमृष्यम् एतद् अभिलष्यति स द्विषतां वधेन विषयाभिरतिम् ।भववीतये न हि तथा स विधिः क्व शरासनं क्व च विमुक्तिपथः ॥

6.45

पृथुदाम्नि तत्र परिबोधि च मा भवतीभिर् अन्यमुनिवद् विकृतिः ।स्वयशांसि विक्रमवताम् अवतां न वधूष्व् अघानि विमृष्यन्ति धियः ॥

6.46

आशंसितापचितिचारु पुरः सुराणाम् आदेशम् इत्य् अभिमुखं समवाप्य भर्तुः ।लेभे परां द्युतिम् अमर्त्यवधूसमूहः सम्भावना ह्य् अधिकृतस्य तनोति तेजः ॥

6.47

प्रणतिम् अथ विधाय प्रस्थिताः सद्मनस् ताः स्तनभरनमिताङ्गीर् अङ्गनाः प्रीतिभाजः ।अचलनलिनलक्ष्मीहारि नालं बभूव स्तिमितम् अमरभर्तुर् द्रष्टुम् अक्ष्णां सहस्रम् ॥

7.1

श्रीमद्भिः सरथगजैः सुराङ्गनानां गुप्तानाम् अथ सचिवैस् त्रिलोकभर्तुः ।संमूर्छन्न् अलघुविमानरन्ध्रभिन्नः प्रस्थानं समभिदधे मृदङ्गनादः ॥

7.2

सोत्कण्ठैर् अमरगणैर् अनुप्रकीर्णान् निर्याय ज्वलितरुचः पुरान् मघोनः ।रामाणाम् उपरि विवस्वतः स्थितानां नासेदे चरितगुणत्वम् आतपत्रैः ॥

7.3

धूतानाम् अभिमुखपातिभिः समीरैर् आयासाद् अविशदलोचनोत्पलानाम् ।आनिन्ये मदजनितां श्रियं वधूनाम् उष्णांशुद्युतिजनितः कपोलरागः ॥

7.4

तिष्ठद्भिः कथम् अपि देवतानुभावाद् आकृष्टैः प्रजविभिर् आयतं तुरङ्गैः ।नेमीनाम् असति विवर्तनई रथौघैर् आसेदे वियति विमानवत् प्रवृत्तिः ॥

7.5

कान्तानां कृतपुलकः स्तनाङ्गरागे वक्त्रेषु च्युततिलकेषु मौक्तिकाभस् ।सम्पेदे श्रमसलिलोद्गमो विभूषा रम्याणां विकृतिर् अपि श्रियं तनोति ॥

7.6

राजद्भिः पथि मरुताम् अभिन्नरूपैर् उल्कार्चिः स्फुटगतिभिर् ध्वजाङ्कुशानाम् ।तेजोभिः कनकनिकाषराजिगौरैर् आयामः क्रियत इव स्म सातिरेकः ॥

7.7

रामाणाम् अवजितमाल्यसौकुमार्ये सम्प्राप्ते वपुषि सहत्वम् आतपस्य ।गन्धर्वैर् अधिगतविस्मयैः प्रतीये कल्याणी विधिषु विचित्रता विधातुः ॥

7.8

सिन्दूरैः कृतरुचयः सहेमकक्ष्याः स्रोतोभिस् त्रिदशगजा मदं क्षरन्तः ।सादृश्यं ययुर् अरुणांशुरागभिन्नैर् वर्षद्भिः स्फुरितशतह्रदैः पयोदैः ॥

7.9

अत्यर्थं दुरुपसदाद् उपेत्य दूरं पर्यन्ताद् अहिममयूखमण्डलस्य ।आशानाम् उपरचिताम् इवैकवेणीं रम्योर्मीं त्रिदशनदीं ययुर् बलानि ॥

7.10

आमत्तभ्रमरकुलाकुलानि धुन्वन्न् उद्धूतग्रथितरजांसि पङ्कजानि ।कान्तानां गगननदीतरङ्गशीतः संतापं विरमयति स्म मातरिश्वा ॥

7.11

सम्भिन्नैर् इभतुरगावगाहनेन प्राप्योर्वीर् अनुपदवीं विमानपङ्क्तीः ।तत्पूर्वं प्रतिविदधे सुरापगाया वप्रान्तस्खलितविवर्तनं पयोभिः ॥

7.12

क्रान्तानां ग्रहचरितात् पथो रथानाम् अक्षाग्रक्षतसुरवेश्मवेदिकानाम् ।निःसङ्गं प्रधिभिर् उपाददे विवृत्तिः सम्पीडक्षुभितजलेषु तोयदेषु ॥

7.13

तप्तानाम् उपदधिरे विषाणभिन्नाः प्रह्लादं सुरकरिणां घनाः क्षरन्तः ।युक्तानां खलु महतां परोपकारे कल्याणी भवति रुजत्स्व् अपि प्रवृत्तिः ॥

7.14

संवाता मुहुर् अनिलेन नीयमाने दिव्यस्त्रीजघनवरांशुके विवृत्तिम् ।पर्यस्यत्पृथुमणिमेखलांशुजालं संजज्ञे युतकम् इवान्तरीयम् ऊर्वोः ॥

7.15

प्रत्यार्द्रीकृततिलकास् तुषारपातैः प्रह्लादं शमितपरिश्रमा दिशन्तः ।कान्तानां बहुमतिम् आययुः पयोदा नाल्पीयान् बहु सुकृतं हिनस्ति दोषः ॥

7.16

यातस्य ग्रथिततरङ्गसैकताभे विच्छेदं विपयसि वारिवाहजाले ।आतेनुस् त्रिदशवधूजनाङ्गभाजां संधानं सुरधनुषः प्रभा मणीनाम् ॥

7.17

संसिद्धाव् इति करणीयसंनिबद्धैर् आलापैः पिपतिषतां विलङ्घ्य वीथीम् ।आसेदे दशशतलोचनध्वजिन्या जीमूतैर् अपिहितसानुर् इन्द्रकीलः ॥

7.18

आकीर्णा मुखनलिनैर् विलासिनीनाम् उद्धूतस्फुटविशदातपत्रफेना ।सा तूर्यध्वनितगभीरम् आपतन्ती भूभर्तुः शिरसि नभोनदीव रेजे ॥

7.19

सेतुत्वं दधति पयोमुचां विताने संरम्भाद् अभिपततो रथाञ् जवेन ।आनिन्युर् नियमितरश्मिभुग्नघोणाः कृच्छ्रेण क्षितिम् अवनामितस् तुरङ्गाः ॥

7.20

माहेन्द्रं नगम् अभितः करेणुवर्याः पर्यन्तस्थितजलदा दिवः पतन्तः ।सादृश्यं निलयननिष्प्रकम्पपक्षैर् आजग्मुर् जलनिधिशायिभिर् नगेन्द्रैः ॥

7.21

उत्सङ्गे समविषमे समं महाद्रेः क्रान्तानां वियदभिपातलाघवेन ।आ मूलाद् उपनदि सैकतेषु लेभे सामग्री खुरपदवी तुरङ्गमाणाम् ॥

7.22

सध्वानं निपतितनिर्झरासु मन्द्रैः संमूर्छन् प्रतिनिनदैर् अधित्यकासु ।उद्ग्रीवैर् घनरवशङ्कया मयूरैः सोत्कण्ठं ध्वनिर् उपशुश्रुवे रथानाम् ॥

7.23

सम्भिन्नाम् अविरलपातिभिर् मयूखैर् नीलानां भृशम् उपमेखलं मणीनाम् ।विच्छिनाम् इव वनिता नभोन्तराले वप्राम्भःस्रुतिम् अवलोकयांबभूवुः ॥

7.24

आसन्नद्विपपदवीमदानिलाय क्रुध्यन्तो धियम् अवमत्य धूर्गतानाम् ।सव्याजं निजकरिणीभिर् आत्तचित्ताः प्रस्थानं सुरकरिणः कथंचिद् ईषुः ॥

7.25

नीरन्ध्रं पथिषु रजो रथाङ्गनुन्नं पर्यस्यन् नवसलिलारुणं वहन्ती ।आतेने वनगहनानि वाहिनी सा घर्मान्तक्षुभितजलेव जह्नुकन्या ॥

7.26

सम्भोगक्षमगहनाम् अथोपगङ्गं बिभ्राणां ज्वलितमणीनि सैकतानि ।अध्यूषुश् च्युतकुसुमाचितां सहाया वृत्रारेर् अविरलशाद्वलां धरित्रीम् ॥

7.27

भूभर्तुः समधिकम् आदधे तदोर्व्याः श्रीमत्तां हरिसखवाहिनीनिवेशः ।संसक्तौ किम् असुलभं महोदयानाम् उच्छ्रायं नयति यदृच्छयापि योगः ॥

7.28

सामोदाः कुसुमतरुश्रियो विविक्ताः सम्पत्तिः किसलयशालिनीलतानाम् ।साफल्यं ययुर् अमराङ्गनोपभुक्ताः सा लक्ष्मीर् उपकुरुते यया परेषाम् ॥

7.29

क्लान्तो ऽपि त्रिदशवधूजनः पुरस्ताल् लीनाहिश्वसितविलोलपल्लवानाम् ।सेव्यानां हतविनयैर् इवावृतानां सम्पर्कं परिहरति स्म चन्दनानाम् ॥

7.30

उत्सृष्टध्वजकुथकङ्कटा धरित्रीम् आनीता विदितनयैः श्रमं विनेतुम् ।आक्षिप्तद्रुमगहना युगान्तवातैः पर्यस्ता गिरय इव द्विपा विरेजुः ॥

7.31

प्रस्थानश्रमजनितां विहाय निद्राम् आमुक्ते गजपतिना सदानपङ्के ।शय्यान्ते कुलमलिनां क्षणं विलीनं संरम्भच्युतम् इव शृङ्खलं चकाशे ॥

7.32

आयस्तः सुरसरिदोघरुद्धवर्त्मा सम्प्राप्तुं वनगजदानगन्धि रोधः ।मूर्धानं निहितशिताङ्कुशं विधुन्वन् यन्तारं न विगणयांचकार नागः ॥

7.33

आरोढुः समवनतस्य पीतशेषे साशङ्कं पयसि समीरिते करेण ।संमार्जन्न् अरुणमदस्रुती कपोलौ सस्यन्दे मद इव शीकरः करेणोः ॥

7.34

आघ्राय क्षणम् अतितृष्यतापि रोषाद् उत्तीरं निहितविवृत्तलोचनेन ।सम्पृक्तं वनकरिनां मदाम्बुसेकैर् नाचेमे हिमम् अपि वारि वारणेन ॥

7.35

प्रश्च्योतन्मदसुरभीणि निम्नगायाः क्रीडन्तो गजपतयः पयांसि कृत्वा ।किञ्जल्कव्यवहितताम्रदानलेखैर् उत्तेरुः सरसिजगन्धिभिः कपोलैः ॥

7.36

आकीर्णं बलरजसा घनारुणेन प्रक्षोभैः सपदि तरङ्गितं तटेषु ।मातङ्गोन्मथितसरोजरेणुपिङ्गं माञ्जिष्ठं वसनम् इवाम्बु निर्बभासे ॥

7.37

श्रीमद्भिर् नियमितकन्धरापरान्तैः संसक्तैर् अगुरुवनेषु साङ्गहारम् ।सम्प्रापे निसृतमदाम्बुभिर् गजेन्द्रैः प्रस्यन्दिप्रचलितगण्डशैलशोभा ॥

7.38

निःशेषं प्रशमितरेणु वारणानां स्रोतोभिर् मदजलम् उज्झताम् अजस्रम् ।आमोदं व्यवहितभूरिपुष्पगन्धो भिन्नैलासुरभिम् उवाह गन्धवाहः ॥

7.39

सादृश्यं दधति गभीरमेघघोषैर् उन्निद्रक्षुभितमृगाधिपश्रुतानि ।आतेनुश् चकितचकोरनीलकण्ठान् कच्छान्तान् अमरमहेभबृंहितानि ॥

7.40

सास्रावसक्तकमनियपरिच्छदानाम् अध्वश्रमातुरवधूजनसेवितानाम् ।जज्ञे निवेशनविभागपरिष्कृतानां लक्ष्मीः पुरोपवनजा वनपादपानाम् ॥

8.1

अथ स्वमायाकृतमन्दिरोज्ज्वलं ज्वलन्मणि व्योमसदां सनातनम् ।सुराङ्गना गोपतिचापगोपुरं पुरं वनानां विजिहीर्षया जहुः ॥

8.2

यथायथं ताः सहिता नभश्चरैः प्रभाभिर् उद्भासितशैलवीरुधः ।वनं विशन्त्यो वनजायतेक्षणाः क्षणद्युतीनां दधुर् एकरूपताम् ॥

8.3

निवृत्तवृत्तोरुपयोधरक्लमः प्रवृत्तैनिर्ह्रादिविभूषणारवः ।नितम्बिनीनां भृशम् आदधे धृतिं नभःप्रयाणाद् अवनौ परिक्रमः ॥

8.4

घनानि कामं कुसुमानि बिभ्रतः करप्रचेयान्य् अपहाय शाखिनः ।पुरो ऽभिसस्रे सुरसुन्दरीजनैर् यथोत्तरेच्छा हि गुणेषु कामिनः ॥

8.5

तनूर् अलक्तारुणपाणिपल्लवाः स्फुरन्नखांशूत्करमञ्जरीभृतः ।विलासिनीबाहुलता वनालयो विलेपनामोदहृताः सिषेविरे ॥

8.6

निपीयमानस्तबका शिलीमुखैर् अशोकयष्टिश् चलबालपल्लवा ।विडम्बयन्ती ददृशे वधूजनैर् अमन्ददष्टौष्ठकरावधूननम् ॥

8.7

करौ धुनाना नवपल्लवाकृती वृथा कृथा मानिनि मा परिश्रमम् ।उपेयुषी कल्पलताभिशङ्कया कथं न्व् इतस् त्रस्यति षट्पदावलिः ॥

8.8

जहीहि कोपं दयितो ऽनुगम्यतां पुरानुशेते तव चञ्चलं मनः ।इति प्रियं कांचिद् उपैतुम् इच्छतीं पुरो ऽनुनिन्ये निपुणः सखीजनः ॥

8.9

समुन्नतैः काशदुकूलशालिभिः परिक्वणत्सारसपङ्क्तिमेखलैः ।प्रतीरदेशैः स्वकलत्रचारुभिर् विभूषिताः कुञ्जसमुद्रयोषितः ॥

8.10

विदूरपातेन भिदाम् उपेयुषश् च्युताः प्रवाहाद् अभितः प्रसारिणः ।प्रियाङ्कशीताः शुचिमौक्तिकत्विषो वनप्रहासा इव वारिबिन्दवः ॥

8.11

सखीजनं प्रेम गुरूकृतादरं निरीक्षमाणा इव नम्रमूर्तयः ।स्थिरद्विरेफाञ्जनशरितोदरैर् विसारिभिः पुष्पविलोचनैर् लताः ॥

8.12

उपेयुषीणां बृहतीर् अधित्यका मनांसि जह्रुः सुरराजयोषिताम् ।कपोलकाषैः करिणां मदारुणैर् उपाहितश्यामरुचश् च चन्दनाः ॥

8.13

स्वगोचरे सत्य् अपि वित्तहारिणा विलोभ्यमानाः प्रसवेन शाखिनाम् ।नभश्चराणाम् उपकर्तुम् इच्छतां प्रियाणि चक्रुः प्रणयेन योषितः ॥

8.14

प्रयच्छतोच्चैः कुसुमानि मानिनी विपक्षगोत्रं दयितेन लम्भिता ।न किंचिद् ऊचे चरणेन केवलं लिलेख बाष्पाकुललोचना भुवम् ॥

8.15

प्रिये ऽपरा यच्छति वाचम् उन्मुखी निबद्धदृष्टिः शिथिलाकुलोच्चया ।समादधे नांशुकम् आहितं वृथा विवेद पुष्पेषु न पाणिपल्लवम् ॥

8.16

सलीलम् आसक्तलतान्तभूषणं समासजन्त्या कुसुमावतंसकम् ।स्तनोपपीडं नुनुदे नितम्बिना घनेन कश्चिज् जघनेन कान्तया ॥

8.17

कलत्रभारेण विलोलनीविना गलद्दुकूलस्तनशालिनोरसा ।बलिव्यपायस्फुटरोमराजिना निरायतत्वाद् उदरेण ताम्यता ॥

8.18

विलम्बमानाकुलकेशपाशया कयाचिद् आविष्कृतबाहुमूलया ।तरुप्रसूनान्य् अपदिश्य सादरं मनोधिनाथस्य मनः समाददे ॥

8.19

व्यपोहितुं लोचनतो मुखानिलैर् अपारयन्तं किल पुष्पजं रजः ।पयोधरेणोरसि काचिद् उन्मनाः प्रियं जघानोन्नतपीवरस्तनी ॥

8.20

इमान्य् अमूनीत्य् अपवर्जिते शनैर् यथाभिरामं कुसुमाग्रपल्लवे ।विहाय निःसारतयेव भूरुहान् पदं वनश्रीर् वनितासु संदधे ॥

8.21

प्रवालभङ्गारुणपाणिपल्लवः परागपाण्डूकृतपीवरस्तनः ।महीरुहः पुष्पसुगन्धिर् आददे वपुर्गुणोच्छ्रायम् इवाङ्गनाजनः ॥

8.22

वरोरुभिर् वारणहस्तपीवरैश् चिराय खिन्नान् नवपल्लवश्रियः ।समे ऽपि यातुं चरणान् अनीश्वरान् मदाद् इव प्रस्खलतः पदे पदे ॥

8.23

विसारिकाञ्चीमणिरश्मिलब्धया मनोहरोच्छायनितम्बशोभया ।स्थितानि जित्वा नवसैकतद्युतिं श्रमातिरिक्तैर् जघनानि गौरवैः ॥

8.24

समुच्छ्वसत्पङ्कजकोशकोमलैर् उपाहितश्रीण्य् उपनीवि नाभिभिः ।दधन्ति मध्येषु वलीविभङ्गिषु स्तनातिभाराद् उदराणि नम्रताम् ॥

8.25

समानकान्तीनि तुषारभूषणैः सरोरुहैर् अस्फुटपत्त्रपङ्क्तिभिः ।चितानि घर्माम्बुकणैः समन्ततो मुखान्य् अनुत्फुल्लविलोचनानि च ॥

8.26

विनिर्यतीनां गुरुस्वेदमन्थरं सुराङ्गनानाम् अनुसानुवर्त्मनः ।सविस्मयं रूपयतो नभश्चरान् विवेश तत्पूर्वम् इवेक्षणादरः ॥

8.27

अथ स्फुरन्मीनविधूतपङ्कजा विपङ्कतीरस्खलितोर्मिसंहतिः ।पयो ऽवगाढुं कलहंसनादिनी समाजुहावेव वधूः सुरापगा ॥

8.28

प्रशान्तघर्माभिभवः शनैर् विवान् विलासिनीभ्यः परिमृष्टपङ्कजः ।ददौ भुजालम्बम् इवात्तशीकरस् तरङ्गमालान्तरगोचरो ऽनिलः ॥

8.29

गतैः सहावैः कलहंसविक्रमं कलत्रभारैः पुलिनं नितम्बिभिः ।मुखैः सरोजानि च दीर्घलोचनैः सुरस्त्रियः साम्यगुणान् निरासिरे ॥

8.30

विभिन्नपर्यन्तगमीनपङ्क्तयः पुरो विगाढाः सखिभिर् मरुत्वतः ।कथंचिद् आपः सुरसुन्दरीजनैः सभीतिभिस् तत्प्रथमं प्रपेदिरे ॥

8.31

विगाढमात्रे रमणीभिर् अम्भसि प्रयत्नसंवाहितपीवरोरुभिः ।विभिद्यमाना विससार सारसान् उदस्य तीरेषु तरङ्गसंहतिः ॥

8.32

शिलाघनैर् नाकसदाम् उरःस्थलैर् बृहन्निवेशैश् च वधूपयोधरैः ।तटाभिनीतेन विभिन्नवीचिना रुषेव भेजे कलुषत्वम् अम्भसा ॥

8.33

विधूतकेशाः परिलोलितस्रजः सुराङ्गनानां प्रविलुप्तचन्दनाः ।अतिप्रसङ्गाद् विहितागसो मुहुः प्रकम्पम् ईयुः सभया इवोर्मयः ॥

8.34

विपक्षचित्तोन्मथना नखव्रणास् तिरोहिता विभ्रममण्डनेन ये ।हृतस्य शेषान् इव कुङ्कुमस्य तान् विकत्थनीयान् दधुर् अन्यथा स्त्रियः ॥

8.35

सरोजपत्रे नु विलीनषट्पदे विलोलदृष्टेः स्विद् अमू विलोचने ।शिरोरुहाः स्विन् नतपक्ष्मसन्ततेर् द्विरेफवृन्दं नु निशब्दनिश्चलम् ॥

8.36

अगूढहासस्फुटदन्तकेसरं मुखं स्विद् एतद् विकसन् नु पङ्कजम् ।इति प्रलीनां नलिनीवने सखीं विदांबभूवुः सुचिरेण योषितः ॥

8.37

प्रियेण संग्रथ्य विपक्षसंनिधाव् उपाहितां वक्षसि पीवरस्तने ।स्रजं न काचिद् विजहौ जलाविलां वसन्ति हि प्रेम्णि गुणा न वस्तुनि ॥

8.38

असंशयं न्यस्तम् उपान्तरक्ततां यद् एव रोद्धुं रमणीभिर् अञ्जनम् ।हृते ऽपि तस्मिन् सलिलेन शुक्लतां निरास रागो नयनेषु न श्रियम् ॥

8.39

द्युतिं वहन्तो वनितावतंसका हृताः प्रलोभाद् इव वेगिभिर् जलैः ।उपप्लुतास् तत्क्षणशोचनीयतां च्युताधिकाराः सचिवा इवाययुः ॥

8.40

विपत्त्रलेखा निरलक्तकाधरा निरञ्जनाक्षीर् अपि बिभ्रतीः श्रियम् ।निरीक्ष्य रामा बुबुधे नभश्चरैर् अलंकृतं तद्वपुषैव मण्डनम् ॥

8.41

तथा न पूर्वं कृतभूषणादरः प्रियानुरागेण विलासिनीजनः ।यथा जलार्द्रो नखमण्डनश्रिया ददाह दृष्टीश् च विपक्षयोषिताम् ॥

8.42

शुभाननाः साम्बुरुहेषु भीरवो विलोलहाराश् चलफेनपङ्क्तिषु ।नितान्तगौर्यो हृतकुङ्कुमेष्व् अलं न लेभिरे ताः परभागम् ऊर्मिषु ॥

8.43

हृदाम्भसि व्यस्तवधूकराहते रवं मृदङ्गध्वनिधीरम् उज्झति ।मुहुस्तनैस् तालस्समं समाददे मनोरमं नृत्यम् इव प्रवेपितम् ॥

8.44

श्रिया हसद्भिः कलमानि सस्मितैर् अलंकृताम्बुः प्रतिमागतैर् मुखैः ।कृतानुकूल्या सुरराजयोषितां प्रसादसाफल्यम् अवाप जाह्नवी ॥

8.45

परिस्फुरन्मीनविघट्टितोरवः सुराङ्गनास् त्रासविलोलदृष्टयः ।उपाययुः कम्पितपाणिपल्लवाः सखीजनस्यापि विलोकनीयताम् ॥

8.46

भयाद् इवाश्लिष्य झषाहते ऽम्भसि प्रियं मुदानन्दयति स्म मानिनी ।अकृत्रिमप्रेमरसाहितैर् मनो हरन्ति रामाः कृतकैर् अपीहितैः ॥

8.47

तिरोहितान्तानि नितान्तम् आकुलैर् अपां विगाहाद् अलकैः प्रसारिभिः ।ययुर् वधूनां वदनानि तुल्यतां द्विरेफवृन्दान्तरितैः सरोरुहैः ॥

8.48

करौ धुनाना नवपल्लवाकृती पयस्य् अगाधे किल जातसम्भ्रमा ।सखीषु निर्वाच्यम् अधार्ष्ट्यदूषितं प्रियाङ्गसंश्लेषम् अवाप मानिनी ॥

8.49

प्रियैः सलीलं करवारिवारितः प्रवृद्धनिःश्वासविकम्पितस्तनः ।सविभ्रमाधूतकराग्रपल्लवो यथार्थताम् आप विलासिनीजनः ॥

8.50

उदस्य धैर्यं दयितेन सादरं प्रसादितायाः करवारिवारितम् ।मुखं निमीलन्नयनं नतभ्रुवः श्रियं सपत्नीवदनाद् इवाददे ॥

8.51

विहस्य पाणौ विधृते धृताम्भसि प्रियेण वध्वा मदनार्द्रचेतसः ।सखीव काञ्ची पयसा घनीकृता बभार वीतोच्चयबन्धम् अंशुकम् ॥

8.52

निरञ्जने साचिविलोकितं दृशाव् अयावकं वेपथुर् ओष्ठपल्लवम् ।नतभ्रुवो मण्डयदि स्म विग्रहे बलिक्रिया चातिलकं तदास्पदम् ॥

8.53

निमीलदाकेकरलोचचक्षुषां प्रियोपकण्ठं कृतगात्रवेपथुः ।निमज्जतीनां श्वसितोद्धतस्तनः श्रमो नु तासां मदनो नु पप्रथे ॥

8.54

प्रियेण सिक्ता चरमं विपक्षतश् चुकोप काचिन् न तुतोष सान्त्वनैः ।जनस्य रूढप्रणयस्य चेतसः किम् अप्य् अमर्षो ऽनुनये भृशायते ॥

8.55

इत्थं विहृत्य वनिताभिर् उदस्यमानं पीनस्तनोरुजघनस्थलशालिनीभिः ।उत्सर्पितोर्मिचयलङ्घिततीरदेशम् औत्सुक्य् अनुन्नम् इव वारि पुरः प्रतस्थे ॥

8.56

तीरान्तराणि मिथुनानि रथाङ्गनाम्नां नीत्वा विलोलितसरोजवनश्रियस् ताः ।संरेजिरे सुरसरिज्जलधौतहारास् तारावितानतरला इव यामवत्यः ॥

8.57

संक्रान्तचन्दनरसाहितवर्णभेदं विच्छिन्नभूषणमणिप्रकरांशुचित्रम् ।बद्धोर्मि नाकवनितापरिभुक्तमुक्तं सिन्धोर् बभार सलिलं शयनीयलक्ष्मीम् ॥

9.1

वीक्ष्य रन्तुमनसः सुरनारीर् आत्तचित्रपरिधानविभूषाः ।तत्प्रियार्थम् इव यातुम् अथास्तं भानुमान् उपपयोधि ललम्बे ॥

9.2

मध्यमोपलनिभे लसदंशाव् एकतश् च्युतिम् उपेयुषि भानौ ।द्यौर् उवाह परिवृत्तिविलोलां हारयष्टिम् इव वासरलक्ष्मीम् ॥

9.3

अंशुपाणिभिर् अतीव पिपासुः पद्मजं मधु भृशं रसयित्वा ।क्षीबताम् इव गतः क्षितिम् एष्यंल् लोहितं वपुर् उवाह पतङ्गः ॥

9.4

गम्यताम् उपगते नयनानां लोहितायाति सहस्रमरीचौ ।आससाद विरहय्य धरित्रीं चक्रवाकहृदयान्य् अभितापः ॥

9.5

मुक्तमूललघुर् उज्झितपूर्वः पश्चिमे नभसि सम्भृतसान्द्रः ।सामि मज्जति रवौ न विरेजे खिन्नजिह्म इव रश्मिसमूहः ॥

9.6

कान्तदूत्य इव कुङ्कुमताम्राः सायमण्डलम् अभि त्वरयन्त्यः ।सादरं ददृशिरे वनिताभिः सौधजालपतिता रविभासः ॥

9.7

अग्रसानुषु नितान्तपिशङ्गैर् भूरुहान् मृदुकरैर् अवलम्ब्य ।अस्तशैलगहनं नु विवस्वान् आविवेश जलधिं नु महीं नु ॥

9.8

आकुलश् चलपतत्रिकुलानाम् आरवैर् अनुदितौषसरागः ।आययाव् अहरिदश्वविपाण्डुस् तुल्यतां दिनमुखेन दिनान्तः ॥

9.9

आस्थितः स्थगितवारिदपङ्क्त्या संध्यया गगनपश्चिमभागः ।सोर्मिविद्रुमविन्तानविभासा रञ्जितस्य जलधेः श्रियम् ऊहे ॥

9.10

प्राञ्जलाव् अपि जने नतमूर्ध्नि प्रेम तत्प्रवणचेतसि हित्वा ।संध्ययानुविदधे विरमन्त्या चापलेन सुजनेतरमैत्री ॥

9.11

औषसातपभयाद् अपलीनं वासरच्छविविरामपटीयः ।संनिपत्य शनकैर् इव निम्नाद् अन्धकारम् उदवाप समानि ॥

9.12

एकताम् इव गतस्य विवेकः कस्यचिन् न महतो ऽप्य् उपलेभे ।भास्वता निदधिरे भुवनानाम् आत्मनीव पतितेन विशेषाः ॥

9.13

इच्छतां सह वधूभिर् अभेदं यामिनीविरहिणां विहगानाम् ।आपुर् एव मिथुनानि वियोगं लङ्घ्यते न खलु कालनियोगः ॥

9.14

यच्छति प्रतिमुखं दयितायै वाचम् अन्तिकगते ऽपि शकुन्तौ ।नीयते स्म नतिम् उज्झितहर्षं पङ्कजं मुखम् इवाम्बुरुहिण्या ॥

9.15

रञ्जिता नु विविधास् तरुशैला नामितं नु गगनं स्थगितं नु ।पूरिता नु विषमेषु धरित्री संहृता नु ककुभस् तिमिरेण ॥

9.16

रात्रिरागमलिनानि विकासं पङ्कजानि रहयन्ति विहाय ।स्पष्टतारकम् इयाय नभः श्रीर् वस्तुम् इच्छति निरापदि सर्वः ॥

9.17

व्यानशे शशधरेण विमुक्तः केतकीकुसुमकेसरपाण्डुः ।चूर्णमुष्टिर् इव लम्भितकान्तिर् वासवस्य दिशम् अंशुसमूहः ॥

9.18

उज्झती शुचम् इवाशु तमिस्राम् अन्तिकं व्रजति तारकराजे ।दिक्प्रसादगुणमण्डनम् ऊहे रश्मिहासविशदं मुखम् ऐन्द्री ॥

9.19

नीलनीरजनिभे हिमगौरं शैलरुद्धवपुषः सितरश्मेः ।खे रराज निपतत्करजालं वारिधेः पयसि गाङ्गम् इवाम्भः ॥

9.20

द्यां निरुन्धद् अतिनीलघनाभं ध्वान्तम् उद्यतकरेण पुरस्तात् ।क्षिप्यमाणम् असितेतरभासा शम्भुनेव करिचर्म चकासे ॥

9.21

अन्तिकान्तिकगतेन्दुविसृष्टे जिह्मतां जहति दीधितिजाले ।निःसृतस् तिमिरभारनिरोधाद् उच्छ्वसन् इव रराज दिगन्तः ॥

9.22

लेखया विमलविद्रुमभासा संततं तिमिरम् इन्दुर् उदासे ।दंष्ट्रया कनकटङ्कपिशङ्ग्या मण्डलं भुव इवादिवराहः ॥

9.23

दीपयन् अथ नभः किरणौघैः कुङ्कुमारुणपयोधरगौरः ।हेमकुम्भ इव पूर्वपयोधेर् उन्ममज्ज शनकैस् तुहिनांशुः ॥

9.24

उद्गतेन्दुम् अविभिन्नतमिस्रां पश्यति स्म रजनीम् अवितृप्तः ।व्यंशुकस्फुटमुखीम् अतिजिह्मां व्रीडया नववधूम् इव लोकः ॥

9.25

न प्रसादम् उचितं गमिता द्यैर् नोद्धृतं तिमिरम् अद्रिवनेभ्यः ।दिङ्मुखेषु न च धाम विकीर्णं भूषितैव रजनी हिमभासा ॥

9.26

मानिनीजनविलोचनपातान् उष्णबाष्पकलुषान् प्रतिगृह्णन् ।मन्दमन्दम् उदितः प्रययौ खं भीतभीत इव शीतमयूखः ॥

9.27

श्लिष्यतः प्रियवधूर् उपकण्ठं तारकास् ततकरस्य हिमांशोः ।उद्वमन् अभिरराज समन्ताद् अङ्गराग इव लोहितरागः ॥

9.28

प्रेरितः शशधरेण करौघः संहतान्य् अपि नुनोद तमांसि ।क्षीरसिन्धुर् इव मन्दरभिन्नः काननान्य् अविरलोच्चतरूणि ॥

9.29

शारतां गमितया शशिपादैश् छायया विटपिनां प्रतिपेदे ।न्यस्तशुक्लबलिचित्रतलाभिस् तुल्यता वसतिवेश्ममहीभिः ॥

9.30

आतपे धृतिमता सह वध्वा यामिनीविरहिणा विहगेन ।सेहिरे न किरणा हिमरश्मेर् दुःखिते मनसि सर्वम् असह्यम् ॥

9.31

गन्धम् उद्धतरजःकणवाही विक्षिपन् विकसतां कुमुदानाम् ।आदुधाव परिलीनविहङ्गा यामिनीमरुद् अपां वनराजीः ॥

9.32

संविधातुम् अभिषेकम् उदासे मन्मथस्य लसदंशुजलौघः ।यामिनीवनितया ततचिह्नः सोत्पलो रजतकुम्भ इवेन्दुः ॥

9.33

ओजसापि खलु नूनम् अनूनं नासहायम् उपयाति जयश्रीः ।यद् विभुः शशिमयूखसखः सन् आददे विजयि चापम् अनङ्गः ॥

9.34

सद्मनां विरचनाहितशोभैर् आगतप्रियकथैर् अपि दूत्यम् ।संनिकृष्टरतिभिः सुरदारैर् भूषितैर् अपि विभूषणम् ईषे ॥

9.35

न स्रजो रुरुचिरे रमणीभ्यश् चन्दनानि विरहे मदिरा वा ।साधनेषु हि रतेर् उपधत्ते रम्यतां प्रियसमागम एव ॥

9.36

प्रस्थिताभिर् अधिनाथनिवासं ध्वंसितप्रियसखीवचनाभिः ।मानिनीभिर् अपहस्तितधैर्यः सादयन्न् इव मदो ऽवललम्बे ॥

9.37

कान्तवेश्म बहु संदिशतीभिर् यातम् एव रतये रमणीभिः ।मन्मथेन परिलुप्तमतीनां प्रायशः स्खलितम् अप्य् उपकारि ॥

9.38

आशु कान्तम् अभिसारितवत्या योषितः पुलकरुद्धकपोलम् ।निर्जिगाय मुखम् इन्दुम् अखण्डं खण्डपत्रतिलकाकृति कान्त्या ॥

9.39

उच्यतां स वचनीयम् अशेषं नेश्वरे परुषता सखि साध्वी ।आनयैनम् अनुनीय कथं वा विप्रियाणि जनयन्न् अनुनेयः ॥

9.40

किं गतेन न हि युक्तम् उपैतुं कः प्रिये सुभगमानिनि मानः ।योषिताम् इति कथासु समेतैः कामिभिर् बहुरसा धृतिर् ऊहे ॥

9.41

योषितः पुलकरोधि दधत्या घर्मवारि नवसंगमजन्म ।कान्तवक्षसि बभूव पतन्त्या मण्डनं लुलितमण्डनतैव ॥

9.42

शीधुपानविधुरासु निगृह्णन् मानम् आशु शिथिलीकृतलज्जः ।संगतासु दयितैर् उपलेभे कामिनीषु मदनो नु मदो नु ॥

9.43

द्वारि चक्षुर् अधिपाणि कपोलौ कीवितं त्वयि कुतः कलहो ऽस्याः ।कामिनाम् इति वचः पुनरुक्तं प्रीतये नवनवत्वम् इयाय ॥

9.44

साचि लोचनयुगं नमयन्ती रुन्धती दयितवक्षसि पातम् ।सुभ्रुवो जनयति स्म विभूषां संगताव् उपरराम च लज्जा ॥

9.45

सव्यलीकम् अवधीरितखिन्नं प्रस्थितं सपदि कोपपदेन ।योषितः सुहृद् इव स्म रुणद्धि प्राणनाथम् अभिबाष्पनिपातः ॥

9.46

शङ्किताय कृतबाष्पनिपाताम् ईर्ष्यया विमुखितां दयिताय ।मानिनिम् अभिमुखाहितचित्तां शंसति स्म घनरोमविभेदः ॥

9.47

लोलदृष्टि वदनं दयितायाश् चुम्बति प्रियतमे रभसेन ।व्रीडया सह विनीवि नितम्बाद् अंशुकं शिथिलताम् उपपदे ॥

9.48

ह्रीतय अगलितनीवि निरस्यन्न् अन्तरीयम् अवलम्बितकाञ्चि ।मण्डलीकृतपृथुस्तनभारं सस्वजे दयितया हृदयेशः ॥

9.49

आदृता नखपदैः परिरम्भाश् चुम्बितानि घनदन्तनिपातैः ।सौकुमार्यगुणसम्भृतकीर्तिर् वाम एव सुरतेष्व् अपि कामः ॥

9.50

पाणिपल्लवविधूननम् अन्तः सीत्कृतानि नयनार्धनिमेषाः ।योषितां रहसि गद्गदवाचाम् अस्त्रताम् उपययुर् मदनस्य ॥

9.51

पातुम् आहितरतीन्य् अभिलेषुस् तर्षयन्त्य् अपुनरुक्तरसानि ।सस्मितानि वदनानि वधूनां सोत्पलानि च मधूनि युवानः ॥

9.52

कान्तसंगमपराजितमन्यौ वारुणीरसनशान्तविवादे ।मानिनीजन उपाहितसंधौ संदधे धनुषि नेषुम् अनङ्गः ॥

9.53

कुप्यताशु भवतानतचित्ताः कोपितांश् च वरिवस्यत यूनः ।इत्य् अनेक उपदेश इव स्म स्वाद्यते युवतिभिर् मधुवारः ॥

9.54

भर्तृभिः प्रणयसम्भ्रमदत्तां वारुणीम् अतिरसां रसयित्वा ।ह्रीविमोहविरहाद् उपलेभे पाटवं नु हृदयं नु वधूभिः ॥

9.55

स्वादितः स्वयम् अथैधितमानं लम्भितः प्रियतमैः सह पीतः ।आसवः प्रतिपदं प्रमदानां नैकरूपरसताम् इव भेजे ॥

9.56

भ्रूविलाससुभगान् अनुकर्तुं विभ्रमान् इव वधूनयनानाम् ।आददे मृदुविलोकपलाशैर् उत्पलैश् चषकवीचिषु कम्पः ॥

9.57

ओष्ठपल्लवविदंशरुचीनां हृद्यताम् उपययौ रमणानाम् ।फुल्ललोचनविनीलसरोजैर् अङ्गनास्यचषकैर् मधुवारः ॥

9.58

प्राप्यते गुणवतापि गुणानां व्यक्तम् आश्रयवशेन विशेषः ।तत् तथा हि दयिताननदत्तं व्यानशे मधु रसातिशयेन ॥

9.59

वीक्ष्य रत्नचषकेष्व् अतिरिक्तां कान्तदन्तपदमण्डनलक्ष्मीम् ।जज्ञिरे बहुमताः प्रमदानाम् ओष्ठयावकनुदो मधुवाराः ॥

9.60

लोचनाधरकृताहृतरागा वासिताननविशेषितगन्धा ।वारुणी परगुणात्मगुणानां व्यत्ययं विनिमयं नु वितेने ॥

9.61

तुल्यरूपम् असितोत्पलम् अक्ष्णोः कर्णगं निरुपकारि विदित्वा ।योषितः सुहृद् इव प्रविभेजे लम्भितेक्षणरुचिर् मदरागः ॥

9.62

क्षीणयावकरसो ऽप्य् अतिपानैः कान्तदन्तपदसम्भृतशोभः ।आययाव् अतितराम् इव वध्वाः सान्द्रताम् अधरपल्लवरागः ॥

9.63

रागजान्तनयनेषु नितान्तं विद्रुमारुणकपोलतलेषु ।सर्वगापि ददृशे वनितानां दर्पणेष्व् इव मुखेषु मदश्रीः ॥

9.64

बद्धकोपविकृतीर् अपि रामाश् चारुताभिमतताम् उपनिन्ये ।वश्यतां मधुमदो दयितानाम् आत्मवर्गहितम् इच्छति सर्वः ॥

9.65

वाससां शिथिलताम् उपनाभि ह्रीनिरासम् अपदे कुपितानि ।योषितां विदधती गुणपक्षे निर्ममार्ज मदिरा वचनीयम् ॥

9.66

भर्तृषूपसखि निक्षिपतीनाम् आत्मनो मधुमदोद्यमितानाम् ।व्रीडया विफलया वनितानां न स्थितं न विगतं हृदयेषु ॥

9.67

रुन्धती नयनवाक्यविकासं सादितो भयकरा परिरम्भे ।व्रीडितस्य ललितं युवतीनां क्षीबता बहुगुणैर् अनुजह्रे ॥

9.68

योषिद् उद्धतमनोभवरागा मानवत्य् अपि ययौ दयिताङ्कम् ।कारयत्य् अनिभृता गुणदोषे वारुणी खलु रहस्यविभेदम् ॥

9.69

आहिते नु मधुना मधुरत्वे चेष्टितस्य गमिते नु विकासम् ।आबभौ नव इवोद्धतरागः कामिनीष्व् अवसरः कुसुमेषोः ॥

9.70

मा गमन् मदविमूढधियो नः प्रोज्झ्य रन्तुम् इति शङ्कितनाथाः ।योषितो न मदिरां भृशम् ईषुः प्रेम पश्यति भयान्य् अपदे ऽपि ॥

9.71

चित्तनिर्वृतिविधायि विविक्तं मन्मथो मधुमदः शशिभासः ।संगमश् च दयितैः स्म नयन्ति प्रेम काम् अपि भुवं प्रमदानाम् ॥

9.72

धार्ष्ट्यलङ्घितयथोचितभूमौ निर्दयं विलुलितालकमाल्ये ।मानिनीरतिविधौ कुसुमेषुर् मत्तमत्त इव विभ्रमम् आप ॥

9.73

शीधुपानविधुरेषु वधूनां विघ्नताम् उपगतेषु वपुःषु ।ईहितं रतिरसाहितभावं वीतलक्ष्यम् अपि कामिषु रेजे ॥

9.74

अन्योन्यरक्तमनसाम् अथ बिभ्रतीनां चेतोभुवो हरिसखाप्सरसां निदेशम् ।वैबोधिकध्वनिविभावितपश्चिमार्धा सा संहृतेव परिवृत्तिम् इयाय रात्रिः ॥

9.75

निद्राविनोदितनितान्तरतिक्लमानाम् आयामिमङ्गलनिनादविबोधितानाम् ।रामासु भाविविरहाकुलितासु यूनां तत्पूर्वताम् इव समादधिरे रतानि ॥

9.76

कान्ताजनं सुरतखेदनिमीलिताक्षं संवाहितुं समुपयान् इव मन्दमन्दम् ।हर्म्येषु माल्यमदिरापरिभोगगन्धान् आविश्चकार रजनीपरिवृत्तिवायुः ॥

9.77

आमोदवासितचलाधरपल्लवेषु निद्राकषायितविपाटललोचनेषु ।व्यामृष्टपत्त्रतिलकेषु विलासिनीनां शोभां बबन्ध वदनेषु मदावशेषः ॥

9.78

गतवति नखलेखालक्ष्यताम् अङ्गरागे समददयितपीताताम्रबिम्बाधराणाम् ।विरहविधुरम् इष्टा सत्सखीवङ्गनानां हृदयम् अवललम्बे रात्रिसम्भोगलक्ष्मीः ॥

10.1

अथ परिमलजाम् अवाप्य लक्ष्मीम् अवयवदीपितमण्डनश्रियस् ताः ।वसतिम् अभिविहाय रम्यहावाः सुरपतिसूनुविलोभनाय जग्मुः ॥

10.2

द्रुतपदम् अभियातुम् इच्छतीनां गमनपरिक्रमलाघवेन तासाम् ।अवनिषु चरणैः पृथुस्तनीनाम् अलघुनितम्बतया चिरं निषेदे ॥

10.3

निहितसरसयावकैर् बभासे चरणतलैः कृतपद्धतिर् वधूनाम् ।अविरलविततेव शक्रगोपैर् अरुणितनीलतृणोलपा धरित्री ॥

10.4

ध्वनिर् अगविवरेषु नूपुराणां पृथुरशनागुणशिञ्जितानुयातः ।प्रतिरवविततो वनानि चक्रे मुखरसम् उत्सुकहंससारसानि ॥

10.5

अवचयपरिभोगवन्ति हिंस्रैः सहचरितान्य् अमृगाणि काननानि ।अभिदधुर् अभितो मुनिं वधूभ्यः समुदितसाध्वसविक्लवं च चेतः ॥

10.6

नृपतिमुनिपरिग्रहेण सा भूः सुरसचिवाप्सरसां जहार चेतः ।उपहितपरमप्रभावधाम्नां न हि जयिनां तपसाम् अलङ्घ्यम् अस्ति ॥

10.7

सचकितम् इव विस्मयाकुलाभिः शुचिसिकतास्व् अतिमानुषाणि ताभिः ।क्षितिषु ददृशिरे पदानि जिष्णोर् उपहितकेतुर् अथाङ्गलाञ्छनानि ॥

10.8

अतिशयितवनान्तरद्युतीनां फलकुसुमावचये ऽपि तद्विधानाम् ।ऋतुर् इव तरुवीरुधां समृद्ध्या युवतिजनैर् जगृहे मुनिप्रभावः ॥

10.9

मृदितकिसलयः सुराङ्गनानां ससलिलवल्कलभारभुग्नशाखः ।बहुमतिम् अधिकां ययाव् अशोकः परिजनतापि गुणाय सद्गुणानाम् ॥

10.10

यमनियमकृशीकृतस्थिराङ्गः परिददृशे विधृतायुधः स ताभिः ।अनुपमशमदीप्ततागरीयान् कृतपदपङ्क्तिर् अथर्वणेव वेदः ॥

10.11

शशधर इव लोचनाभिरामैर् गगनविसारिभिर् अंशुभिः परीतः ।शिखरनिचयम् एकसानुसद्मा सकलम् इवापि दधन् महीधरस्य ॥

10.12

सुरसरिति परं तपो ऽधिगच्छन् विधृतपिशङ्गबृहज्जटाकलापः ।हविर् इव विततः शिखासमूहैः समभिलषन्न् उपवेदि जातवेदाः ॥

10.13

सदृशम् अतनुम् आकृतेः प्रयत्नं तदनुगुणाम् अपरैः क्रियाम् अलङ्घ्याम् ।दधद् अलघु तपः क्रियानुरूपं विजयवतीं च तपःसमां समृद्धिम् ॥

10.14

चिरनियमकृशो ऽपि शैलसारः शमनिरतो ऽपि दुरासदः प्रकृत्या ।ससचिव इव निर्जने ऽपि तिष्ठन् मुनिर् अपि तुल्यरुचिस् त्रिलोकभर्तुः ॥

10.15

तनुम् अवजितलोकसारधाम्नीं त्रिभुवनगुप्तिसहां विलोकयन्त्यः ।अवययुर् अमरस्त्रियो ऽस्य यत्नं विजयफले विफलं तपोधिकारे ॥

10.16

मुनिदनुतनयान् विलोभ्य सद्यः प्रतनुबलान्य् अधितिष्ठतस् तपांसि ।अलघुनि बहु मेनिरे च ताः स्वं कुलिशभृता विहितं पदे नियोगम् ॥

10.17

अथ कृतकविलोभनं विधित्सौ युवतिजने हरिसूनुदर्शनेन ।प्रसभम् अवततार चित्तजन्मा हरति मनो मधुरा हि यौवनश्रीः ॥

10.18

सपदि हरिसखैर् वधूनिदेशाद् ध्वनितमनोरमवल्लकीमृदङ्गैः ।युगपद् ऋतुगणस्य संनिधानं वियति वने च यथायथं वितेने ॥

10.19

सजलजलधरं नभो विरेजे विवृतिम् इयाय रुचिस् तडिल्लतानाम् ।व्यवहितरतिविग्रहैर् वितेने जलगुरुभिः स्तनितैर् दिगन्तरेषु ॥

10.20

परिसुरपतिसूनुधाम सद्यः समुपदधन् मुकुलानि मालतीनाम् ।विरलम् अपजहार बद्धबिन्दुः सरजसताम् अवनेर् अपां निपातः ॥

10.21

प्रतिदिशम् अभिगच्छताभिमृष्टः ककुभविकाससुगन्धिनानिलेन ।नव इव विबभौ सचित्तजन्मा गतधृतिर् आकुलितश् च जीवलोकः ॥

10.22

व्यथितम् अपि भृशं मनो हरन्ती परिणतजम्बुफलोपभोगहृष्टा ।परभृतयुवतिः स्वनं वितेने नवनवयोजितकण्ठरागरम्यम् ॥

10.23

अभिभवति मनः कदम्बवायौ मदमधुरे च शिखण्डिनां निनादे ।जन इव न धृतेश् चचाल जिष्णुर् न हि महतां सुकरः समाधिभङ्गः ॥

10.24

धृतबिसवलयावलिर् वहन्ती कुमुदवनैकदुकूलम् आत्तबाणा ।शरदमलतले सरोजपाणौ घनसमयेन वधूर् इवाललम्बे ॥

10.25

समदशिखिरुतानि हंसनादैः कुमुदवनानि कदम्बपुष्पवृष्ट्या ।श्रियम् अतिशयिनीं समेत्य जग्मुर् गुणमहतां महते गुणाय योगः ॥

10.26

सरजसम् अपहाय केतकीनां प्रसवम् उपान्तिकनीपरेणुकीर्णम् ।प्रियमधुरसनानि षट्पदाली मलिनयति स्म विनीलबन्धनानि ॥

10.27

मुकुलितम् अतिशय्य बन्धुजीवं धृतजलबिन्दुषु शाद्वलस्थलीषु ।अविरलवपुषः सुरेन्द्रगोपा विकचपलाशचयश्रियं समीयुः ॥

10.28

अविरलफलिनीवनप्रसूनः कुसुमितकुन्दसुगन्धिगन्धवाहः ।गुणम् असमयजं चिराय लेभे विरलतुषारकण्।अस् तुषारकालः ॥

10.29

निचयिनि लवलीलताविकासे जनयति लोध्रसमीरणे च हर्षम् ।विकृतिम् उपययौ न पाण्डुसूनुश् चलति नयान् न जिगीषतां हि चेतः ॥

10.30

कतिपयसहकारपुष्परम्यस् तनुतुहिनो ऽल्पविनिद्रसिन्दुवारः ।सुरभिमुखहिमागमान्तशंसी समुपययौ शिशिरः स्मरैकबन्धुः ॥

10.31

कुसुमनगवनान्य् उपैतुकामा किसलयिनीम् अवलम्ब्य चूतयष्टिम् ।क्वणदलिकुलनूपुरा निरासे नलिनवनेषु पदं वसन्तलक्ष्मीः ॥

10.32

विकसितकुसुमाधरं हसन्तीं कुरबकराजिवधूं विलोकयन्तम् ।ददृशुर् इव सुराङ्गना निषण्णं सशरम् अनङ्गम् अशोकपल्लवेषु ॥

10.33

मुहुर् अनुपतता विधूयमानं विरचितसंहति दक्षिणानिलेन ।अलिकुलम् अलकाकृतिं प्रपेदे नलिनमुखान्तविसर्पि पङ्कजिन्याः ॥

10.34

श्वसनचलितपल्लवाधरोष्ठे नवनिहितेर्ष्यम् इवावधूनयन्ती ।मधुसुरभिणि षट्पदेन पुष्पे मुख इव शाललतावधूश् चुचुम्बे ॥

10.35

प्रभवति न तदा परो विजेतुं भवति जितेन्द्रियता यद् आत्मरक्षा ।अवजितभुवनस् तथा हि लेभे सिततुरगे विजयं न पुष्पमासः ॥

10.36

कथम् इव तव संमतिर् भवित्री समम् ऋतुभिर् मुनिनावधीरितस्य ।इति विरचितमल्लिकाविकासः स्मयत इव स्म मधुं निदाघकालः ॥

10.37

बलवद् अपि बलं मिथोविरोधि प्रभवति नैव विपक्षनिर्जयाय ।भुवनपरिभवी न यत् तदानीं तम् ऋतुगणः क्षणम् उन्मनीचकार ॥

10.38

श्रुतिसुखम् उपवीणितं सहायैर् अविरललाञ्छनहारिणश् च कालाः ।अविहितहरिसूनुविक्रियाणि त्रिदशवधूषु मनोभवं वितेनुः ॥

10.39

न दलति निचये तथोत्पलानां न च विषमच्छदगुच्छयूथिकासु ।अभिरतुम् उपलेभिरे यथासां हरितनयावयवेषु लोचनानि ॥

10.40

मुनिम् अभिमुखतां निनीषवो याः समुपययुः कमनीयतागुणेन ।मदनम् उपदधे स एव तासां दुरधिगमा हि गतिः प्रयोजनानाम् ॥

10.41

प्रकृतम् अनुससार नाभिनेयं प्रविकसदङ्गुलि पाणिपल्लवं वा ।प्रथमम् उपहितं विलासि चक्षुः सिततुरगे न चचाल नर्तकीनाम् ॥

10.42

अभिनयमनसः सुराङ्गनाया निहितम् अलक्तकवर्तनाभिताम्रम् ।चरणम् अभिपपात षट्पदाली धुतनवलोहितपङ्कजाभिशङ्का ॥

10.43

अविरलम् अलसेषु नर्तकीनां द्रुतपरिषिक्तम् अलक्तकं पदेषु ।सवपुषाम् इव चित्तरागम् ऊहुर् नमितशिखानि कदम्बकेसराणि ॥

10.44

नृपसुतम् अभितः समन्मथायाः परिजनगात्रतिरोहिताङ्गयष्टेः ।स्फुटम् अभिलषितं बभूव वध्वा वदति हि संवृतिर् एव कामितानि ॥

10.45

अभिमुनि सहसा हृते परस्या घनमरुता जघनांशुकैकदेशे ।चकितम् अवसनोरु सत्रपायाः प्रतियुवतीर् अपि विस्मयं निनाय ॥

10.46

धृतबिसवलये निधाय पाणौ मुखम् अधिरूषितपाण्डुगण्डलेखम् ।नृपसुतम् अपरा स्मराभितापाद् अमधुमदालसलोचनं निदध्यौ ॥

10.47

सखि दयितम् इहानयेति सा मां प्रहितवती कुसुमेषुणाभितप्ता ।हृदयम् अहृदया न नाम पूर्वं भवदुपकण्ठम् उपागतं विवेद ॥

10.48

चिरम् अपि कलितान्य् अपारयन्त्या परिगदितुं परिशुष्यता मुखेन ।गतघृण गमितानि सत्सखीनां नयनयुगैः समम् आर्द्रतां मनांसि ॥

10.49

अचकमत सपल्लवां धरित्रीं मृदुसुरभिं विरहय्य पुष्पशय्याम् ।भृशम् अरतिम् अवाप्य तत्र चास्यास् तव सुखशीतम् उपैतुम् अङ्कम् इच्छा ॥

10.50

तद् अनघ तनुर् अस्तु सा सकामा व्रजति पुरा हि परासुतां त्वदर्थे ।पुनर् अपि सुलभं तपो ऽनुरागी युवतिजनः खलु नाप्यते ऽनुरूपः ॥

10.51

जहिहि कठिनतां प्रयच्छ वाचं ननु करुणामृदु मानसं मुनीनाम् ।उपगतम् अवधीरयन्त्य् अभव्याः स निपुणम् एत्य कयाचिद् एवम् ऊचे ॥

10.52

सललितचलितत्रिकाभिरामाः शिरसिजसंयमनाकुलैकपाणिः ।सुरपतितनये ऽपरा निरासे मनसिजजैत्रशरं विलोचनार्धम् ॥

10.53

कुसुमितम् अवलम्ब्य चूतम् उच्चैस् तनुर् इभकुम्भपृथुस्तनानताङ्गी ।तदभिमुखम् अनङ्गचापयष्टिर् विसृतगुणेव समुन्ननाम काचित् ॥

10.54

सरभसम् अवलम्ब्य नीलम् अन्या विगलितनीवि विलोलम् अन्तरीयम् ।अभिपतितुमनाः ससाध्वसेव च्युतरशनागुणसंदितावतस्थे ॥

10.55

यदि मनसि शमः किम् अङ्ग चापं शठ विषयास् तव वल्लभा न मुक्तिः ।भवतु दिशति नान्यकामिनीभ्यस् तव हृदये हृदयेश्वरावकाशम् ॥

10.56

इति विषमितचक्षुषाभिधाय स्फुरदधरोष्ठम् असूयया कयाचित् ।अगणितगुरुमानलज्जयासौ स्वयम् उरसि श्रवणोत्पलेन जघ्ने ॥

10.57

सविनयम् अपराभिसृत्य साचि स्मितसुभगैकलसत्कपोललक्ष्मीः ।श्रवणनियमितेन तं निदध्य सकलम् इवासकलेन लोचनेन ॥

10.58

करुणम् अभिहितं त्रपा निरस्ता तदभिमुखं च विमुक्तम् अश्रु ताभिः ।प्रकुपितम् अभिसारणे ऽनुनेतुं प्रियम् इयती ह्य् अबलाजनस्य भूमिः ॥

10.59

असकलनयनेक्षितानि लज्जा गतम् अलसं परिपाण्डुता विषादः ।इति विविधम् इयाय तासु भूषां प्रभवति मण्डयितुं वधूर् अनङ्गः ॥

10.60

अलसपदमनोरमं प्रकृत्या जितकलहंसवधूगति प्रयातम् ।स्थितम् उरुजघनस्थलातिभाराद् उदितपरिश्रमजिह्मितेक्षणं वा ॥

10.61

भृशकुसुमशरेषुपातमोहाद् अनवसितार्थपदाकुलो ऽभिलापः ।अधिकविततलोचनं वधूनाम् अयुगपद् उन्नमितभ्रु वीक्षितं च ॥

10.62

रुचिकरम् अपि नार्थवद् बभूव स्तिमितसमाधिशुचौ पृथातनूजे ।ज्वलयति महतां मनांस्य् अमर्षे न हि लभते ऽवसरं सुखाभिलाषः ॥

10.63

स्वयं संराध्यैवं शतमखम् अखण्डेन तपसा परोच्छित्त्या लभ्याम् अभिलषति लक्ष्मीं हरिसुते ।मनोभिः सोद्वेगैः प्रणयविहतैध्वस्तरुचयः सगन्धर्मा धाम त्रिदशवनिताः स्वं प्रतिययुः ॥

11.1

अथामर्षान् निसर्गाच् च जितेन्द्रियतया तया ।आगजामाश्रमं जिष्णोः प्रतीतः पाकशासनः ॥

11.2

मुनिरूपो ऽनुरूपेण सूनुना ददृशे पुरः ।द्राघीयसा वयोतीतः परिक्लान्तः किलाध्वना ॥

11.3

जटानां कीर्णया केशैः संहत्या परितः सितैः ।पृक्तयेन्दुकरैर् अह्नः पर्यन्त इव संध्यया ॥

11.4

विशदभ्रूयुगच्छन्नवलितापाङ्गलोचनः ।प्रालेयावततिम्लानपलाशाब्ज इव ह्रदः ॥

11.5

आसक्तभरनीकाशैर् अङ्गैः परिकृशैर् अपि ।अद्यूनः सद्गृहिण्य् एव प्रायो यष्ट्यावलम्बितः ॥

11.6

गूढो ऽपि वपुषा राजन् धाम्ना लोकाभिभाविना ।अंशुमान् इव तन्वभ्रपटलच्छन्नविग्रहः ॥

11.7

जरतीम् अपि बिभ्राणस् तनुम् अप्राकृताकृतिः ।चकाराक्रान्तलक्ष्मीकः ससाध्वसम् इवाश्रयम् ॥

11.8

अभितस् तं पृथासूनुः स्नेहेन परितस्तरे ।अविज्ञाते ऽपि बन्धौ हि बलात् प्रह्लादते मनः ॥

11.9

आतिथेयीम् अथासाद्य सुतादपचितिं हरिः ।विश्रम्य विष्टरे नाम व्याजहारेति भारतीम् ॥

11.10

त्वया साधु समारम्भि नवे वयसि यत् तपः ।ह्रियते विषयैः प्रायो वर्षीयान् अपि मादृशः ॥

11.11

श्रेयसीं तव सम्प्राप्ता गुणसम्पदम् आकृतिः ।सुलभा रम्यता लोके दुर्लभं हि गुणार्जनम् ॥

11.12

शरदम्बुधरच्छाया गत्वर्यो यौवनश्रियः ।आपातरम्या विषयाः पर्यन्तपरितापिनः ॥

11.13

अन्तकः पर्यवस्थाता जन्मिनः संततापदः ।इति त्याज्ये भवे भव्यो मुक्ताव् उत्तिष्ठते मनः ॥

11.14

चित्तवान् असि कल्याणी यत् त्वां मतिर् उपस्थिता ।विरुद्धः केवलं वेषः संदेहयति मे मनः ॥

11.15

युयुत्सुनेव कवचं किम् आमुक्तम् इदं त्वया ।तपस्विनो हि वसते केवलाजिनवल्कले ॥

11.16

प्रपित्सोः किं च ते मुक्तिं निःस्पृहस्य कलेवरे ।महेषुधी धनुर् भीमं भूतानाम् अनभिद्रुहः ॥

11.17

भयंकरः प्राणभृतां मृत्योर् भुज इवापरः ।असिस् तव तपस्थस्य न समर्थयते शमम् ॥

11.18

जयम् अत्रभवान् नूनम् अरातिष्व् अभिलाषुकः ।क्रोधलक्ष्म क्षमावन्तः क्वायुधं क्व तपोधनाः ॥

11.19

यः करोति वधोदर्का निःश्रेयसकरीः क्रियाः ।ग्लानिदोषच्छिदः स्वच्छाः स मूढः पङ्कयत्य् अपः ॥

11.20

मूलं दोषस्य हिंसादेर् अर्थकामौ स्म मा पुषः ।तौ हि तत्त्वावबोधस्य दुरुच्छेदाव् उपप्लवौ ॥

11.21

अभिद्रोहेण भूतानाम् अर्जयन् गत्वरीः श्रियः ।उदन्वान् इव सिन्धूनाम् आपदाम् एति पात्रताम् ॥

11.22

या गम्याः सत्सहायानां यासु खेदो भयं यतः ।तासां किं यन् न दुःखाय विपदाम् इव सम्पदाम् ॥

11.23

दुरासदान् अरीन् उग्रान् धृतेर् विश्वासजन्मनः ।भोगान् भोगान् इवाहेयान् अध्यास्यापन् न दुर्लभा ॥

11.24

नान्तरज्ञाः श्रियो जातु प्रियैर् आसां न भूयते ।आसक्तास् तास्व् अमी मूढा वामशीला हि जन्तवः ॥

11.25

को ऽपवादः स्तुतिपदे यद् अशीलेषु चञ्चलाः ।साधुवृत्तान् अपि क्षुद्रा विक्षिपन्त्य् एव सम्पदः ॥

11.26

कृतवान् अन्यदेहेषु कर्ता च विधुरं मनः ।अप्रियैर् इव संयोगो विप्रयोगः प्रियैः सह ॥

11.27

शून्यम् आकीर्णताम् एति तुल्यं व्यसनम् उत्सवैः ।विप्रलम्भो ऽपि लाभाय सति प्रियसमागमे ॥

11.28

तदा रम्याण्य् अरम्याणि प्रियाः शल्यं तदासवः ।तदैकाकी सबन्धुः सन्न् इष्टेन रहितो यदा ॥

11.29

युक्तः प्रमाद्यसि हिताद् अपेतः परितप्यसे ।यदि नेष्टात्मनः पीडा मा सञ्जि भवता जने ॥

11.30

जन्मिनो ऽस्य स्थितिं विद्वांल् लक्ष्मीम् इव चलाचलाम् ।भवान् मा स्म वधीन् न्याय्यं न्यायाधारा हि साधवः ॥

11.31

विजहीहि रणोत्साहं मा तपः साधि नीनशः ।उच्छेदं जन्मनः कर्तुम् एधि शान्तस् तपोधन ॥

11.32

जीयन्तां दुर्जया देहे रिपवश् चक्षुरादयः ।जितेषु ननु लोको ऽयं तेषु कृत्स्नस् त्वया जितः ॥

11.33

परवान् अर्थसंसिद्धौ नीचवृत्तिर् अपत्रपः ।अविधेयेन्द्रियः पुंसां गौर् इवैतेइ विधेयताम् ॥

11.34

श्वस् त्वया सुखसंवित्तिः स्मरणीयाधुनातनी ।इति स्वप्नोपमान् मत्वा कामान् मा गास् तदङ्गताम् ॥

11.35

श्रद्धेया विप्रलब्धारः प्रिया विप्रियकारिणः ।सुदुस्त्यजास् त्यजन्तो ऽपि कामाः कष्टा हि शत्रवः ॥

11.36

विविक्ते ऽस्मिन् नगे भूयः प्लाविते जह्नुकन्यया ।प्रत्यासीदति मुक्तिस् त्वां पुरा मा भूर् उदायुधः ॥

11.37

व्याहृत्य मरुतां पत्याव् इति वाचम् अवस्थिते ।वचः प्रश्रयगम्भीरम् अथोवाच कपिध्वजः ॥

11.38

प्रसादरम्यम् ओजस्वि गरीयो लाघवान्वितम् ।साकाङ्क्षम् अनुपस्कारं विष्वग्गति निराकुलम् ॥

11.39

न्यायनिर्णीतसारत्वान् निरपेक्षम् इवागमे ।अप्रकम्प्यतयान्येषाम् आम्नायवचनोपमम् ॥

11.40

अलङ्घ्यत्वाज् जनैर् अन्यैः क्षुभितोदन्वदूर्जितम् ।औदार्याद् अर्थसम्पत्तेः शान्तं चित्तम् ऋषेर् इव ॥

11.41

इदम् ईदृग्गुणोपेतं लब्धावसरसाधनम् ।व्याकुर्यात् कः प्रियं वाक्यं यो वक्ता नेदृगाशयः ॥

11.42

न ज्ञातं तात यत्नस्य पौर्वापर्यम् अमुष्य ते ।शासितुं येन मां धर्मं मुनिभिस् तुल्यम् इच्छसि ॥

11.43

अविज्ञातप्रबन्धस्य वचो वाचस्पतेर् इव ।व्रजत्य् अफलताम् एव नयद्रुह इवेहितम् ॥

11.44

श्रेयसो ऽप्य् अस्य ते तात वचसो नास्मि भाजनम् ।नभसः स्फुटतारस्य रात्रेर् इव विपर्ययः ॥

11.45

क्षत्रियस् तनयः पाण्डोर् अहं पार्थो धनंजयः ।स्थितः प्रास्तस्य दायादैर् भ्रातुर् ज्येष्ठस्य शासने ॥

11.46

कृष्णद्वैपायनादेशाद् बिभर्मि व्रतम् ईदृशम् ।भृशम् आराधने यत्तः स्वाराध्यस्य मरुत्वतः ॥

11.47

दुरक्षान् दीव्यता राज्ञा राज्यम् आत्मा वयं वधूः ।नीतानि पणतां नूनम् ईदृशी भवितव्यता ॥

11.48

तेनानुजसहायेन द्रौपद्या च मया विना ।भृशम् आयामियामासु यामिनीष्व् अभितप्यते ॥

11.49

हृतोत्तरीयां प्रसभं सभायाम् आगतह्रियः ।मर्मच्छिदा नो वचसा निरतक्षन्न् अरातयः ॥

11.50

उपाधत्त सपत्नेषु कृष्णाया गुरुसंनिधौ ।भावम् आनयने सत्याः सत्यंकारम् इवान्तकः ॥

11.51

ताम् ऐक्षन्त क्षणं सभ्या दुःशासनपुरःसराम् ।अभिसायार्कम् आवृत्तां छायाम् इव महातरोः ॥

11.52

अयथार्थक्रियारम्भैः पतिभिः किं तवेक्षितैः ।अरुध्येताम् इतीवास्या नयने बाष्पवारिणे ॥

11.53

सोढवान् नो दशाम् अन्त्यां ज्यायान् एव गुणप्रियः ।सुलभो हि द्विषां भङ्गो दुर्लभा सत्स्व् अवाच्यता ॥

11.54

स्थित्यतिक्रान्तिभीरूणि स्वच्छान्य् आकुलितान्य् अपि ।तोयानि तोयराशीनां मनांसि च मनस्विनाम् ॥

11.55

धार्तराष्ट्रैः सह प्रीतिर् वैरम् अस्मास्व् असूयत ।असन्मैत्री हि दोषाय कूलच्छायेव सेविता ॥

11.56

अपवादाद् अभीतस्य समस्य गुणदोषयोः ।असद्वृत्तेर् अहोवृत्तं दुर्विभावं विधेर् इव ॥

11.57

ध्वंसेत हृदयं सद्यः परिभूतस्य मे परैः ।यद्य् अमर्षः प्रतीकारं भुजालम्बं न लम्भयेत् ॥

11.58

अवधूयारिभिर् नीता हरिणैस् तुल्यवृत्तिताम् ।अन्योन्यस्यापि जिह्रीमः किं पुनः सहवासिनाम् ॥

11.59

शक्तिवैकल्यनम्रस्य निःसारत्वाल् लघीयसः ।जन्मिनो मानहिनस्य तृणस्य च समा गतिः ॥

11.60

अलङ्घ्यं तत् तद् उद्वीक्ष्य यद् यद् उच्चैर् महीभृताम् ।प्रियतां ज्यायसीं मा गान् महतां केन तुङ्गता ॥

11.61

तावद् आश्रीयते लक्ष्म्या तावद् अस्य स्थिरं यशः ।पुरुषस् तावद् एवासौ यावन् मानान् न हीयते ॥

11.62

स पुमान् अर्थवज् जन्मा यस्य नाम्नि पुरःस्थिते ।नान्याम् अङ्गुलिम् अभ्येति संख्यायाम् उद्यताङ्गुलिः ॥

11.63

दुरासदवनज्यायान् गम्यस् तुङ्गो ऽपि भूधरः ।न जहाति महौजस्कं मानप्रांशुम् अलङ्घ्यता ॥

11.64

गुरून् कुर्वन्ति ते वंश्यान् अन्वर्था तैर् वसुंधरा ।येषां यशांसि शुभ्राणि ह्रेपयन्तीन्दुमण्डलम् ॥

11.65

उदाहरणम् आशीःषु प्रथमे ते मनस्विनाम् ।शुष्के ऽशनिर् इवामर्षो यैर् अरातिषु पात्यते ॥

11.66

न सुखं प्रार्थये नार्थम् उदन्वद्वीचिचञ्चलम् ।नानित्यताशनेस् त्रस्यन् विविक्तं ब्रह्मणः पदम् ॥

11.67

प्रमार्ष्टुम् अयशःपङ्कम् इच्छेयं छद्मना कृतम् ।वैधव्यतापितारातिवनितालोचनाम्बुभिः ॥

11.68

अपहस्ये ऽथवा सद्भिः प्रमादो वास्तु मे धियः ।अस्थानविहितायासः कामं जिह्रेतु वा भवान् ॥

11.69

वंशलक्ष्मीम् अनुद्धृत्य समुच्छेदेन विद्विषाम् ।निर्वाणम् अपि मन्ये ऽहम् अन्तरायं जयश्रियः ॥

11.70

अजन्मा पुरुषस् तावद् गतासुस् तृणम् एव वा ।यावन् नेषुभिर् आदत्ते विलुप्तम् अरिभिर् यशः ॥

11.71

अनिर्जयेन द्विषतां यस्यामर्षः प्रशाम्यति ।पुरुषोक्तिः कथं तस्मिन् ब्रूहि त्वं हि तपोधन ॥

11.72

कृतं पुरुषशब्देन जातिमात्रावलम्बिना ।यो ऽङ्गीकृतगुणैः श्लाघ्यः सविस्मयम् उदाहृतः ॥

11.73

ग्रसमानम् इवौजांसि सदसा गौरवेरितम् ।नाम यस्याभिनन्दन्ति द्विषो ऽपि स पुमान् पुमान् ॥

11.74

यथाप्रतिज्ञं द्विषतां युधि प्रतिचिकीर्षया ।ममैवाध्येति नृपतिस् तृष्यन्न् इव जलाञ्जलेः ॥

11.75

स वंशस्यावदातस्य शशाङ्कस्येव लाञ्छनम् ।कृच्छ्रेषु व्यर्थया यत्र भूयते भर्तुर् आज्ञया ॥

11.76

कथं वादीयताम् अर्वाङ् मुनिता धर्मरोधिनी ।आश्रमानुक्रमः पूर्वैः स्मर्यते न व्यतिक्रमः ॥

11.77

आसक्ता धूर् इयं रूढा जननी दूरगा च मे ।तिरस्करोति स्वातन्त्र्यं ज्यायांश् चाचारवान् नृपः ॥

11.78

स्वधर्मम् अनुरुन्धन्ते नातिक्रमम् अरातिभिः ।पलायन्ते कृतध्वंसा नाहवान् मानशालिनः ॥

11.79

विच्छिन्नाभ्रविलायं वा विलीये नगमूर्धनि ।आराध्य वा सहस्राक्षम् अयशःशल्यम् उद्धरे ॥

11.80

इत्य् उक्तवन्तं परिरभ्य दोर्भ्यां तनूजम् आविष्कृतदिव्यमूर्तिः ।अघोपघातं मघवा विभूत्यै भवोद्भवाराधनम् आदिदेश ॥

11.81

प्रीते पिनाकिनि मया सह लोकपालैर् लोकत्रये ऽपि विहिताप्रतिवार्यवीर्यः ।लक्ष्मीं समुत्सुकयितासि भृशं परेषाम् उच्चार्य वाचम् इति तेन तिरोबभूवे ॥

12.1

अथ वासवस्य वचनेन रुचिरवदनस् त्रिलोचनम् ।क्लान्तिरहितम् अभिराधयितुं विधिवत् तपांसि विदधे धनंजयः ॥

12.2

अभिरश्मिमालि विमलस्य धृतजयधृतेर् अनाशुषः ।तस्य भुवि बहुतिथास् तिथयः प्रतिजग्मुर् एकचरणं निषीदतः ॥

12.3

वपुरिन्द्रियोपतपनेषु सततम् असुखेषु पाण्डवः ।व्याप नगपतिर् इव स्थिरतां महतां हि धैर्यम् अविभाव्यवैभवम् ॥

12.4

न पपात संनिहितपक्तिसुरभिषु फलेषु मानसम् ।तस्य शुचिनि शिशिरे च पयस्य् अमृतायते हि सुतपः सुकर्मणाम् ॥

12.5

न विसिस्मिये न विषसाद मुहुर् अलसतां नु चाददे ।सत्त्वम् उरुधृति रजस्तमसी न हतः स्म तस्य हतशक्तिपेलवे ॥

12.6

तपसा कृशं वपुर् उवाह स विजितजगत्त्रयोदयम् ।त्रासजननम् अपि तत्त्वविदां किम् इवास्ति यन् न सुकरं मनस्विभिः ॥

12.7

ज्वलतो ऽनलाद् अनुनिशीथम् अधिकरुचिर् अम्भसां निधेः ।धैर्यगुणम् अवजयन् विजयी ददृशे समुन्नततरः स शैलतः ॥

12.8

जपतः सदा जपम् उपांशु वदनम् अभितो विसारिभिः ।तस्य दशनकिरणैः शुशुभे परिवेषभीषणम् इवार्कमण्डलम् ॥

12.9

कवचं स बिभ्रद् उपवीतपदनिहितसज्यकार्मुकः ।शैलपतिर् इव महेन्द्रधनुःपरिवीतभीमगहनो विदिद्युते ॥

12.10

प्रविवेश गाम् इव कृशस्य नियमसवनाय गच्छतः ।तस्य पदविनमितो हिमवान् गुरुतां नयन्ति हि गुणा न संहतिः ॥

12.11

परिकीर्णम् उद्यतभुजस्य भुवनविवरे दुरासदम् ।ज्योतिर् उपरि शिरसो विततं जगृहे निजान् मुनिदिवौकसां पथः ॥

12.12

रजनीषु राजतनयस्य बहुलसमये ऽपि धामभिः ।भिन्नतिमिरनिकरं न जहे शशिरश्मिसंगमयुजा नभः श्रिया ॥

12.13

महता मयूखनिचयेन शमितरुचि जिष्णुजन्मना ।ह्रीतम् इव नभसि वीतमले न विराजते स्म वपुर् अंशुमालिनः ॥

12.14

तम् उदीरितारुणजटांशुम् अधिगुणशरासनं जनाः ।रुद्रम् अनुदितललाटदृशं ददृशुर् मिमन्थिषुम् इवासुरीः पुरीः ॥

12.15

मरुतां पतिः स्विद् अहिमांशुर् उत पृथुशिखः शिखी तपः ।तप्तुम् असुकरम् उपक्रमते न जनो ऽयम् इत्य् अवयये स तापसैः ॥

12.16

न ददाह भूरुहवनानि हरितनयधाम दूरगम् ।न स्म नयति परिशोषम् अपः सुसहं बभूव न च सिद्धतापसैः ॥

12.17

विनयं गुणा इव विवेकम् अपनयभिदं नया इव ।न्यायम् अवधय इवाशरणाः शरणं ययुः शिवम् अथो महर्षयः ॥

12.18

परिवीतम् अंशुभिर् उदस्तदिनकरमयूखमण्डलैः ।शम्भुम् उपहतदृशः सहसा न च ते निचायितुम् अभिप्रसेहिरे ॥

12.19

अथ भूतभव्यभवदीशम् अभिमुखयितुं कृतस्तवाः ।तत्र महसि ददृशुः पुरुषं कमनीयविग्रहम् अयुग्मलोचनम् ॥

12.20

ककुदे वृषस्य कृतबाहुम् अकृशपरिणाहशालिनि ।स्पर्शसुखम् अनुभवन्तम् उमाकुचयुग्ममण्डल इवार्द्रचन्दने ॥

12.21

स्थितम् उन्नते तुहिनशैलशिरसि भुवनातिवर्तिना ।साद्रिजलधिजलवाहपथं सदिगश्नुवानम् इव विश्वम् ओजसा ॥

12.22

अनुजानुमध्यमवसक्तविततवपुषा महाहिना ।लोकम् अखिलम् इव भूमिभृता रवितेजसाम् अवधिनाधिवेष्टितम् ॥

12.23

परिणाहिना तुहिनराशिविशदम् उपवीतसूत्रताम् ।नीतम् उरगम् अनुरञ्जयता शितिना गलेन विलसन्मरीचिना ॥

12.24

प्लुतमालतीसितकपालकमुदम् उपरुद्धमूर्धजम् ।शेषम् इव सुरसरित्पयसां शिरसा विसारि शशिधाम बिभ्रतम् ॥

12.25

मुनयस् ततो ऽभिमुखम् एत्य नयनविनिमेषनोदिताः ।पाण्डुतनयतपसा जनितं जगताम् अशर्म भृशम् आचचक्षिरे ॥

12.26

तरसैव को ऽपि भुवनैकपुरुष पुरुषस् तपस्यति ।ज्योतिरमलवपुषो ऽपि रवेर् अभिभूय वृत्र इव भीमविग्रहः ॥

12.27

स धनुर्महेषुधि निभर्ति कवचम् असितम् उत्तमं जटाः ।वल्कम् अजिनम् इति चित्रम् इदं मुनिताविरोधि न च नास्य राजते ॥

12.28

चलने ऽवनिश् चलति तस्य करणनियमे सदिङ्मुखम् ।स्तम्भम् अनुभवति शान्तमरुद्ग्रहतारकागणयुतं नभस्तलम् ॥

12.29

स तदोजसा विजितसारम् अमरदितिजोपसंहितम् ।विश्वम् इदम् अपिदधाति पुरा किम् इवास्ति यन् न तपसाम् अदुष्करम् ॥

12.30

विजिगीषते यदि जगन्ति युगपद् अथ संजिहीर्षति ।प्राप्तुम् अभवम् अभिवाञ्छति वा वयम् अस्य नो विषहितुं क्षमा रुचः ॥

12.31

किम् उपेक्षसे कथय नाथ न तव विदितं न किंचन ।त्रातुम् अलम् अभयदार्हसि नस् त्वयि मा स्म शासति भवत्पराभवः ॥

12.32

इति गां विधाय विरतेषु मुनिषु वचनं समाददे ।भिन्नजलधिजलनादगुरु ध्वनयन् दिशां विवरम् अन्धकान्तकः ॥

12.33

बदरीतपोवननिवासनिरतम् अवगात मान्यथा ।धातुर् उदयनिधने जगतां नरम् अंशम् आदिपुरुषस्य गां गतम् ॥

12.34

द्विषतः परासिसिषुर् एष सकलभुवनाभितापिनः ।क्रान्तकुलिशकरवीर्यबलान् मदुपासनं विहितवान् महत् तपः ॥

12.35

अयम् अच्युतश् च वचनेन सरसिरुहजन्मनः प्रजाः ।पातुम् असुरनिधनेन विभू भुवम् अभ्युपेत्य मनुजेषु तिष्ठतः ॥

12.36

सुरकृत्यम् एतद् अवगम्य निपुणम् इति मूकदानवः ।हन्तुम् अभिपतति पाण्डुसुतं त्वरया तद् अत्र सह गम्यतां मया ॥

12.37

विवरे ऽपि नैनम् अनिगूढम् अभिभवितुम् एष पारयन् ।पापनिरतिर् अविशङ्कितया विजयं व्यवस्यति वराहमायया ॥

12.38

निहते विडम्बितकिरातनृपतिवपुषा रिपौ मया ।मुक्तनिशितविशिखः प्रसभं मृगयाविवादम् अयम् आचरिष्यति ॥

12.39

तपसा निपीडितकृशस्य विरहितसहायसम्पदः ।सत्त्वविहितम् अतुलं भुजयोर् बलम् अस्य पश्यत मृधे ऽधिकुप्यतः ॥

12.40

इति तान् उदारम् अनुनीय विषमहरिचन्दनालिना ।घर्मजनितपुलकेन लसद्गजमौक्तिकावलिगुणेन वक्षसा ॥

12.41

वदनेन पुष्पितलतान्तनियमितविलम्बितमौलिना ।बिभ्रद् अरुणनयनेन रुचं शिखिपिच्छलाञ्छितकपोलभित्तिना ॥

12.42

बृहदुद्वहञ् जलदनादि धनुर् उपहितैकमार्गणम् ।मेघनिचय इव संववृते रुचिरः किरातपृतनापतिः शिवः ॥

12.43

अनुकूलम् अस्य च विचिन्त्य गणपतिभिर् आत्तविग्रहैः ।शूलपरशुशरचापभृतैर् महती वनेचरचमूर् विनिर्ममे ॥

12.44

विरचय्य काननविभागम् अनुगिरम् अथेश्वराज्ञया ।भीमनिनदपिहितोरुभुवः परितो ऽपदिश्य मृगयां प्रतस्थिरे ॥

12.45

क्षुभिताभिनिःसृतविभिन्नशकुनिमृगयूथनिःस्वनैः ।पूर्णपृथुवनगुहाविवरः सहसा भयाद् इव ररास भूधरः ॥

12.46

न विरोधिनी रुषम् इयाय पथि मृगविहङ्गसंहतिः ।घ्नन्ति सहजम् अपि भूरिभियः समम् आगताः सपदि वैरम् आपदः ॥

12.47

चमरीगणैर् गणबलस्य बलवति भये ऽप्य् उपस्थिते ।वंशविततिषु विषक्तपृथुप्रियबालवालधिभिर् आददे धृतिः ॥

12.48

हरसैनिकाः प्रतिभये ऽपि गजमदसुगन्धिकेसरैः ।स्वस्थम् अभिददृशिरे सहसा प्रतिबोधजृम्भमुखैर् मृगाधिपैः ॥

12.49

बिभरांबभूवुर् अपवृत्तजठरशफरीकुलाकुलाः ।पङ्कविषमिततटाः सरितः करिरुग्णचन्दनरसारुणं पयः ॥

12.50

महिषक्षतागुरुतमालनलदसुरभिः सदागतिः ।व्यस्तशुकनिभशिलाकुसुमः प्रणुदन् ववौ वनसदां परिश्रमम् ॥

12.51

मथिताम्भसो रयविकीर्णमृदितकदलीगवेधुकाः ।क्लान्तजलरुहलताः सरसीर् विदधे निदाघ इव सत्त्वसम्प्लवः ॥

12.52

इति चालयन्न् अचलसानुवनगहनजान् उमापतिः ।प्राप मुदितहरिणीदशनक्षतवीरुधं वसतिम् ऐन्द्रसूनवीम् ॥

12.53

स तम् आससाद घननीलम् अभिमुखम् उपस्थितं मुनेः ।पित्रनिकषणविभिन्नभुवं दनुजं दधानम् अथ सौकरं वपुः ॥

12.54

कच्छान्ते सुरसरितो निधाय सेनाम् अन्वितः सकतिपयैः किरातवर्यैः ।प्रच्छन्नस् तरुगहनैः सगुल्मजालैर् लक्ष्मीवान् अनुपदम् अस्य सम्प्रतस्थे ॥

13.1

वपुषां परमेण भूधराणाम् अथ सम्भाव्यपराक्रमं विभेदे ।मृगम् आशु विलोकयांचकार स्थिरदंष्ट्रोग्रमुखं महेन्द्रसूनुः ॥

13.2

स्फुटबद्धसटोन्नतिः स दूराद् अभिधावन्न् अवधीरितान्यकृत्यः ।जयम् इच्छति तस्य जातशङ्के मनसीमं मुहुर् आददे वितर्कम् ॥

13.3

घनपोत्रविदीर्णशालमूलो निबिडस्कन्धनिकाषरुग्णवप्रः ।अयम् एकचरो ऽभिवर्तते मां समरायेव समाजुहूषमाणः ॥

13.4

इह वीतभयास् तपोनुभावाज् जहति व्यालमृगाः परेषु वृत्तिम् ।मयि तां सुतराम् अयं विधत्ते विकृतिः किं नु भवेद् इयं नु माया ॥

13.5

अथवैष कृतज्ञयेव पूर्वं भृशम् आसेवितया रुषा न मुक्तः ।अवधूय विरोधिनीः किम् आरान् मृगजातीर् अभियाति मां जवेन ॥

13.6

न मृगः खलु को ऽप्य् अयं जिघांसुः स्खलति ह्य् अत्र तथा भृशं मनो मे ।विमलं कलुषीभवच् च चेतः कथयत्य् एव हितैषिणं रिपुं वा ॥

13.7

मुनिर् अस्मि निरागसः कुतो मे भयम् इत्य् एष न भूतये ऽभिमानः ।परवृद्धिषु बद्धमत्सराणां किम् इव ह्य् अस्ति दुरात्मनाम् अलङ्घ्यम् ॥

13.8

दनुजः स्विद् अयं क्षपाचरो वा वनजे नेति बलं बद् अस्ति सत्त्वे ।अभिभूय तथा हि मेघनीलः सकलं कम्पयतीव शैलराजम् ॥

13.9

अयम् एव मृगव्यसत्त्रकामः प्रहरिष्यन् मयि मायया शमस्थे ।पृथुभिर् ध्वजिनीस्रवैर् अकार्षीच् चकितोद्भ्रान्तमृगाणि काननानि ॥

13.10

बहुशः कृतसत्कृतेर् विधातुं प्रियम् इच्छन्न् अथवा सुयोधनस्य ।क्षुभितं वनगोचराभियोगाद् गणम् आशिश्रियद् आकुलं तिरश्चाम् ॥

13.11

अवलीढसनाभिर् अश्वसेनः प्रसभं खाण्डवजातवेदसा वा ।प्रतिकर्तुम् उपागतः समन्युः कृतमन्युर् यदि वा वृकोदरेण ॥

13.12

बलशालितया यथा तथा वा धियम् उच्छेदपरामयं दधानः ।नियमेन मया निबर्हणीयः परमं लाभम् अरातिभङ्गम् आहुः ॥

13.13

कुरु तात तपांस्य् अमार्गदायी विजयायेत्य् अलम् अन्वशान् मुनिर् माम् ।बलिनश् च वधाद् ऋते ऽस्य शक्यं व्रसंरक्षणम् अन्यथा न कर्तुम् ॥

13.14

इति तेन विचिन्त्य चापनाम प्रथमं पौरुषचिह्नम् आललम्बे ।उपलब्धगुणः परस्य भेदे सचिवः शुद्ध इवाददे च बाणः ॥

13.15

अनुभाववता गुरु स्थिरत्वाद् अविसंवादि धनुर् धनंजयेन ।स्वबलव्यसने ऽपि पीड्यमानं गुणवन् मित्रम् इवानतिं प्रपेदे ॥

13.16

प्रविकर्षनिनादभिन्नरन्ध्रः पदविष्टम्भनिपीडितस् तदानीम् ।अधिरोहति गाण्डिवं महेषौ सकलः संशयम् आरुरोह शैलः ॥

13.17

ददृशे ऽथ सविस्मयं शिवेन स्थिरपूर्णायतचापमण्डलस्थः ।रचितस् तिसृणां पुरां विधातुं वधम् आत्मेव भयानकः परेषाम् ॥

13.18

विचकर्ष च संहितेषुर् उच्चैश् चरणास्कन्दननामिताचलेन्द्रः ।धनुरायतभोगवासुकिज्यावदनग्रन्थिविमुक्तवह्नि शम्भुः ॥

13.19

स भवस्य भवक्षयैकहेतोः सितसप्तेश् च विधास्यतोः सहार्थम् ।रिपुर् आप पराभवाय मध्यं प्रकृतिप्रत्यययोर् इवानुबन्धः ॥

13.20

अथ दीपितवारिवाहवर्त्मा रववित्रासितवारणाद् अवार्यः ।निपपात जवादिषु पिनाकान् महतो ऽभ्राद् इव वैद्युतः कृशानुः ॥

13.21

व्रजतो ऽस्य बृहत् पतत्रजन्मा कृतताक्ष्योपनिपातवेगशङ्कः ।प्रतिनादमहान् महोरगाणां हृदयश्रोत्रभिद् उत्पपात नादः ॥

13.22

नयनाद् इव शूलिनः प्रवृत्तैर् मनसो ऽप्य् आशुतरं यतः पिशङ्गैः ।विदधे विलसत्तडिल्लताभैः किरणैर् व्योमनि मार्गणस्य मार्गः ॥

13.23

अपयन् धनुषः शिवान्तिकस्थैर् विवरेसद्भिर् अभिख्यया जिहानः ।युगपद् ददृशे विशन् वराहं तदुपोढैश् च नभश्चरैः पृषत्कः ॥

13.24

स तमालनिभे रिपौ सुराणां घननीहार इवाविषक्तवेगः ।भयविप्लुतम् ईक्षितो नभःस्थैर् जगतीं ग्राह इवापगां जगाहे ॥

13.25

सपदि प्रियरूपपर्वरेखः सितलोहाग्रनखः खम् आससाद ।कुपितान्तकतर्जनाङ्गुलिश्रीर् व्यथयन् प्राणभृतः कपिध्वजेषु ॥

13.26

परमास्त्रपरिग्रहोरुतेजः स्फुरदुल्काकृति विक्षिपन् वनेषु ।स जवेन पतन् परःशतानां पततां व्रात इवारवं वितेने ॥

13.27

अविभावितनिष्क्रमप्रयाणः शमितायाम इवातिरंहसा सः ।सह पूर्वतरं नु चित्तवृत्तेर् अपतित्वा नु चकार लक्ष्यभेदम् ॥

13.28

स वृषध्वजसायकावभिन्नं जयहेतुः प्रतिकायम् एषणीयम् ।लघु साधयितुं शरः प्रसेहे विधिनेवार्थम् उदीरितं प्रयत्नः ॥

13.29

अविवेकवृथाश्रमाव् इवार्थं क्षयलोभाव् इव संश्रितानुरागम् ।विजिगीषुम् इवानयप्रमादाव् अवसादं विशिखौ विनिन्यतुस् तम् ॥

13.30

अथ दीर्घतमं तमः प्रवेक्ष्यन् सहसा रुग्णग्रयः स सम्भ्रमेण ।निपतन्तम् इवोष्णरश्मिम् उर्व्यां वलयीभूततरुं धरां च मेने ॥

13.31

स गतः क्षितिम् उष्णशोणितार्द्रः खुरदंष्ट्राग्रनिपातदारिताश्मा ।असुभिः क्षणम् ईक्षितेन्द्रसूनिर् विहितामर्षगुरुध्वनिर् निरासे ॥

13.32

स्फुटपौरुषम् आपपात पार्थस् तम् अथ प्राज्यशरः शरं जिघृक्षुः ।न तथा कृतवेदिनां करिष्यन् प्रियताम् एति यथा कृतावदानः ॥

13.33

उपकार इवासति प्रयुक्तः स्थितिम् अप्राप्य मृगे गतः प्रणाशम् ।कृतशक्तिर् अवाङ्मुखो गुरुत्वाज् जनितव्रीड इवात्मपौरुषेण ॥

13.34

स समुद्धरता विचिन्त्य तेन स्वरुचं कीर्तिम् इवोत्तमां दधानः ।अनुयुक्त इव स्ववार्तम् उच्चैः परिरेभे नु भृशं विलोचनाभ्याम् ॥

13.35

तत्र कार्मुकभृतं महाभुजः पश्यति स्म सहसा वनेचरम् ।संनिकाशयितुम् अग्रतः स्थितं शासनं कुसुमचापविद्विषः ॥

13.36

स प्रयुज्य तनये महीपतेर् आत्मजातिसदृशीं किलानतिम् ।सान्त्वपूर्वम् अभिनीतिहेतुकं वक्तुम् इत्थम् उपचक्रमे वचः ॥

13.37

शान्तता विनययोगि मानसं भूरिधाम विमलं तपः श्रुतम् ।प्राह ते नु सदृशी दिवौकसाम् अन्ववायम् अवदातम् आकृतिः ॥

13.38

दीपितस् त्वम् अनुभावसम्पदा गौरवेण लघयन् महीभृतः ।राजसे मुनिर् अपीह कारयन्न् आधिपत्यम् इव शातमन्यवम् ॥

13.39

तापसो ऽपि विभुताम् उपेयिवान् आस्पदं त्वम् असि सर्वसम्पदाम् ।दृश्यते हि भवतो विना जनैर् अन्वितस्य सचिवैर् इव द्युतिः ॥

13.40

विस्मयः क इव वा जयश्रिया नैव मुक्तिर् अपि ते दवीयसी ।ईप्सितस्य न भवेद् उपाश्रयः कस्य निर्जितरजस्तमोगुणः ॥

13.41

ह्रेपयन्न् अहिमतेजसं त्विषा स त्वम् इत्थम् उपपन्नपौरुषः ।हर्तुम् अर्हसि वराहभेदिनं नैनम् अस्मदधिपस्य सायकम् ॥

13.42

स्मर्यते तनुभृतां सनातनं न्याय्यम् आचरितम् उत्तमैर् नृभिः ।ध्वंसते यदि भवादृशस् ततः कः प्रयातु वद तेन वर्त्मना ॥

13.43

आकुमारम् उपदेष्टुम् इच्छवः संनिवृत्तिम् अपथान् महापदः ।योगशक्तिजितजन्ममृत्यवः शीलयन्ति यतयः सुशीलताम् ॥

13.44

तिष्ठतां तपसि पुण्यम् आसजन् सम्पदो ऽनुगुणयन् सुखैषिणाम् ।योगिनां परिणमन् विमुक्तये केन नास्तु विनयः सतां प्रियः ॥

13.45

नूनम् अत्रभवतः शराकृतिं सर्वथायम् अनुयाति सायकः ।सो ऽयम् इत्य् अनुपपन्नसंशयः कारितस् त्वम् अपथे पदं यया ॥

13.46

अन्यदीयविशिखे न केवलं निःस्पृहस्य भवितव्यम् आहृते ।निघ्नतः परनिबर्हितं मृगं व्रीडितव्यम् अपि ते सचेतसः ॥

13.47

संततं निशमयन्त उत्सुका यैः प्रयान्ति मुदम् अस्य सूरयः ।कीर्तितानि हसिते ऽपि तानि यं व्रीडयन्ति चरितानि मानिनम् ॥

13.48

अन्यदोषम् इव सः स्वकं गुणं ख्यापयेत् कथम् अधृष्टताजडः ।उच्यते स खलु कार्यवत्तया धिग् विभिन्नबुधसेतुम् अर्थिताम् ॥

13.49

दुर्वचं तद् अथ मा स्म भून् मृगस् त्वाव् असौ यद् अकरिष्यद् ओजसा ।नैनम् आशु यदि वाहिनीपतिः प्रत्यपत्स्यत शितेन पत्त्रिणा ॥

13.50

को न्व् इमं हरितुरङ्गम् आयुधस्थेयसीं दधतम् अङ्गसंहतिम् ।वेगवत्तरमृते चमूपतेर् हन्तुम् अर्हति शरेण दंष्ट्रिणम् ॥

13.51

मित्रम् इष्टम् उपकारि संशये मेदिनीपतिर् अयं तथा च ते ।तं विरोध्य भवता निरासि मा सज्जनैकवसतिः कृतज्ञता ॥

13.52

लभ्यम् एकसुकृतेन दुर्लभा रक्षितारम् असुरक्ष्यभूतयः ।स्वन्तम् अन्तविरसा जिगीषतां मित्रलाभम् अनु लाभसम्पदः ॥

13.53

चञ्चलं वसु नितान्तम् उन्नता मेदिनीम् अपि हरन्त्य् अरातयः ।भूधरस्थिरम् उपेयम् आगतं मावमंस्त सुहृदं महीपतिम् ॥

13.54

जेतुम् एव भवता तपस्यते नायुधानि दधते मुमुक्षवः ।प्राप्स्यते च सकलं महीभृता संगतेन तपसः फलं त्वया ॥

13.55

वाजिभूमिर् इभराजकाननं सन्ति रत्ननिचयाश् च भूरिशः ।काञ्चनेन किम् इवास्य पत्त्रिणा केवलं न सहते विलङ्घनम् ॥

13.56

सावलेपम् उपलिप्सते परैर् अभ्युपैति विकृतिं रजस्य् अपि ।अर्थितस् तु न महान् समीहते जीवितं किमु धनं धनायितुम् ॥

13.57

तत् तदीयविशिखातिसर्जनाद् अस्तु वां गुरु यदृच्छयागतम् ।राघवप्लवगराजयोर् इव प्रेम युक्तम् इतरेतराश्रयम् ॥

13.58

नाभियोक्तुम् अनृतं त्वम् इष्यते कस् तपस्विविशिखेषु चादरः ।सन्ति भूभृति शरा हि नः परे ये पराक्रमवसूनि वज्रिणः ॥

13.59

मार्गणैर् अथ तव प्रयोजनं नाथसे किमु पतिं न भूभृतः ।त्वद्विधं सुहृदम् एत्य स अर्थिनं किं न यच्छति विजित्य मेदिनीम् ॥

13.60

तेन सूरिर् उपकारिताधनः कर्तुम् इच्छति न याचितं वृथा ।सीदताम् अनुभवन्न् इवार्थिनां वेद यत् प्रणयभङ्गवेदनाम् ॥

13.61

शक्तिर् अर्थपतिषु स्वयंग्रहं प्रेम कारयति वा निरत्ययम् ।कारणद्वयम् इदं निरस्यतः प्रार्थनाधिकबले विपत्फला ॥

13.62

अस्त्रवेदम् अधिगम्य तत्त्वतः कस्य चेह भुजवीर्यशालिनः ।जामदग्न्यम् अपहाय गीयते तापसेषु चरितार्थम् आयुधम् ॥

13.63

अभ्यघानि मुनिचापलात् त्वया यन् मृगः क्षितिपतेः परिग्रहः ।अक्षमिष्ट तद् अयं प्रमाद्यतां संवृणोति खलु दोषम् अज्ञता ॥

13.64

जन्मवेषतपसां विरोधिनीं मा कृथाः पुनर् अमूम् अपक्रियाम् ।आपद् एत्य् उभयलोकदूषणी वर्तमानम् अपथे हि दुर्मतिम् ॥

13.65

यष्टुम् इच्छसि पितॄन् न साम्प्रतं संवृतो ऽर्चिचयिषुर् दिवौकसः ।दातुम् एव पदवीम् अपि क्षमः किं मृगे ऽङ्ग विशिखं न्यवीविशः ॥

13.66

सज्जनो ऽसि विजहीहि चापलं सर्वदा क इव वा सहिष्यते ।वारिधीन् इव युगान्तवायवः क्षोभयन्त्य् अनिभृता गुरून् अपि ॥

13.67

अस्त्रवेदविद् अयं महीपतिः पर्वतीय इति मावजीगणः ।गोपितुं भुवम् इमां मरुत्वता शैलवासम् अनुनीय लम्भितः ॥

13.68

तत् तितिक्षितम् इदं मया मुनेर् इत्य् अवोचत वचश् चमूपतिः ।बाणम् अत्रभवते निजं दिशन्न् आप्नुहि त्वम् अपि सर्वसम्पदः ॥

13.69

आत्मनीनम् उपतिष्ठते गुणाः सम्भवन्ति विरमन्ति चापदः ।इत्य् अनेकफलभाजि मा स्म भूद् अर्थिता कथम् इवार्यसंगमे ॥

13.70

दृश्यताम् अयम् अनोकहान्तरे तिग्महेतिपृतनाभिर् अन्वितः ।साहिवीचिर् इव सिन्धुर् उद्धतो भूपतिः समयसेतुवारितः ॥

13.71

सज्यं धनुर् वहति यो ऽहिपतिस्थवीयः स्थेयाञ् जयन् हरितुरङ्गमकेतुलक्ष्मीम् ।अस्यानुकूलय मतिं मतिमन्न् अनेन सख्या सुखं समभियास्यसि चिन्तितानि ॥

14.1

ततः किरातस्य वचोभिर् उद्धतैः पराहतः शैल इवार्णवाम्बुभिः ।जहौ न धैर्यं कुपितो ऽपि पाण्डवः सुदुर्ग्रहान्तःकरणा हि साधवः ॥

14.2

सलेशम् उल्लिङ्गितशात्रवेङ्गितः कृती गिरां विस्तरतत्त्वसंग्रहे ।अयं प्रमाणीकृतकालसाधनः प्रशान्तसंरम्भ इवाददे वचः ॥

14.3

विविक्तवर्णाभरणा सुखश्रुतिः प्रसादयन्ती हृदयान्य् अपि द्विषाम् ।प्रवर्तते नाकृतपुण्यकर्मणां प्रसन्नगम्भीरपदा सरस्वती ॥

14.4

भवन्ति ते सभ्यतमा विपश्चितां मनोगतं वाचि निवेशयन्ति ये ।नयन्ति तेष्व् अप्य् उपपन्ननैपुणा गम्भीरम् अर्थं कतिचित् प्रकाशताम् ॥

14.5

स्तुवन्ति गुर्वीम् अभिधेयसम्पदं विशुद्धिमुक्तेर् अपरे विपश्चितः ।इति स्थितायां प्रतिपूरुषं रुचौ सुदुर्लभाः सर्वमनोरमा गिरः ॥

14.6

समस्य सम्पादयता गुणैर् इमां त्वया समारोपितभार भारतीम् ।प्रगल्भम् आत्मा धुरि धुर्य वाग्मिनां वनचरेणापि सताधिरोपितः ॥

14.7

प्रयुज्य सामाचरितं विलोभनं भयं विभेदाय धियः प्रदर्शितम् ।तथाभियुक्तं च शिलीमुखार्थिना यथेतरन् न्याय्यम् इवावभासते ॥

14.8

विरोधि सिद्धेर् इति कर्तुम् उद्यतः स वारितः किं भवता न भूपतिः ।हिते नियोज्यः खलु भूतिम् इच्छता सहार्थनाशेन नृपो ऽनुजीविना ॥

14.9

ध्रुवं प्रणाशः प्रहितस्य पत्त्रिणः शिलोच्चये तस्य विमार्गणं नयः ।न युक्तम् अत्रार्यजनातिलङ्घनं दिशत्य् अपायं हि सताम् अतिक्रमः ॥

14.10

अतीतसंख्या विहिता ममाग्निना शिलामुखाः खाण्डवम् अत्तुम् इच्छता ।अनादृतस्यामरसायकेष्व् अपि स्थिता कथं शैलजनाशुगे धृतिः ॥

14.11

यदि प्रमाणीकृतम् आर्यचेष्टितं किम् इत्य् अदोषेण तिरस्कृता वयम् ।अयातपूर्वा परिवादगोचरं सतां हि वाणी गुणम् एव भाषते ॥

14.12

गुणापवादेन तदन्यरोपणाद् भृशाधिरूढस्य समञ्जसं जनम् ।द्विधेव कृत्वा हृदयं निगूहतः स्फुरद् असाधोर् विवृणोति वागसिः ॥

14.13

वनाश्रयाः कस्य मृगाः परिग्रहाः शृणाति यस् तान् प्रसभेन तस्य ते ।प्रहीयताम् अत्र नृपेण मानिता न मानिता चास्ति भवन्ति च श्रियः ॥

14.14

न वर्त्म कस्मैचिद् अपि प्रदीयताम् इति व्रतं मे विहितं महर्षिणा ।जिघांसुर् अस्मान् निहतो मया मृगो व्रताभिरक्षा हि सताम् अलंक्रिया ॥

14.15

मृगान् विनिघ्नन् मृगयुः स्वहेतुना कृतोपकारः कथम् इच्छतां तपः ।कृपेति चेद् अस्तु मृगः क्षतः क्षणाद् अनेन पूर्वं न मयेति का गतिः ॥

14.16

अनायुधे सत्त्वजिघांसिते मुनौ कृपेति वृत्तिर् महताम् अकृत्रिमा ।शरासनं बिभ्रति सज्यसायकं कृतानुकम्पः स कथं प्रतीयते ॥

14.17

अथो शरस् तेन मदर्थम् उज्झितः फलं च तस्य प्रतिकायसाधनम् ।अविक्षते तत्र मयात्मसात्कृते कृतार्थता नन्व् अधिका चमूपतेः ॥

14.18

यद् आत्थ कामं भवता स याच्यताम् इति क्षमं नैतद् अनल्पचेतसाम् ।कथं प्रसह्याहरणैषिणां प्रियः परावनत्या मलिनीकृताः श्रियः ॥

14.19

अभूतम् आसज्य विरुद्धम् ईहितं बलाद् अलभ्यं तव लिप्सते नृपः ।विजानतो ऽपि ह्य् अनयस्य रौद्रतां भवत्य् अपाये परिमोहिनी मतिः ॥

14.20

असिः शरा वर्म धनुश् च नोच्चकैर् विविच्य किं प्रार्थितम् ईश्वरेण ते ।अथास्ति शक्तिः कृतम् एव याच्ञया न दूषितः शक्तिमतां स्वयंग्रहः ॥

14.21

सखा स युक्तः कथितः कथं त्वया यदृच्छयासूयति यस् तपस्यते ।गुणार्जनोच्छ्रायविरुद्धबुद्धयः प्रकृत्यमित्रा हि सताम् असाधवः ॥

14.22

वयं क्व वर्णाश्रमरक्षणोचिताः क्व जातिहीना मृगजीवितच्छिदः ।सहापकृष्टैर् महतां न संगतं भवन्ति गोमायुसखा न दन्तिनः ॥

14.23

परो ऽवजानाति यद् अज्ञताजडस् तद् उन्नतानां न विहन्ति धीरताम् ।समानवीर्यान्वयपौरुषेषु यः करोत्य् अतिक्रान्तिम् असौ तिरस्क्रिया ॥

14.24

यदा विगृह्णाति हतं तदा यशः करोति मैत्रीम् अथ दूषिता गुणाः ।स्थितिं समीक्ष्योभयथा परीक्षकः करोत्य् अवज्ञोपहतं पृथग्जनम् ॥

14.25

मया मृगान् हन्तुर् अनेन हेतुना विरुद्धम् आक्षेपवचस् तितिक्षितम् ।शरार्थम् एष्यत्य् अथ लप्स्यते गतिं शिरोमणिं दृष्टिविषाज् जिघृक्षतः ॥

14.26

इतीरिताकूतम् अनीलवाजिनं जयाय दूतः प्रतितर्ज्य तेजसा ।ययौ समीपं ध्वजिनीम् उपेयुषः प्रसन्नरूपस्य विरूपचक्षुषः ॥

14.27

ततो ऽपवादेन पताकिनीपतेश् चचाल निर्ह्रादवती महाचमूः ।युगान्तवाताभिहतेव कुर्वती निनादम् अम्भोनिधिवीचिसंहतिः ॥

14.28

रणाय जैत्रः प्रदिशन्न् इव त्वरां तरङ्गितालम्बितकेतुसंततिः ।पुरो बलानां सघनाम्बुशीकरः शनैः प्रतस्थे सुरभिः समीरणः ॥

14.29

जयारवक्ष्वेडितनादमूर्छितः शरासनज्यातलवारणध्वनिः ।असम्भवन्भूधरराजकुक्षिषु प्रकम्पयन् गाम् अवतस्तरे दिशः ॥

14.30

निशातरौद्रेषु विकासतां गतैः प्रदीपयद्भिः ककुभाम् इवान्तरम् ।वनेसदां हेतिषु भिन्नविग्रहैर् विपुस्फुरे रश्मिमतो मरीचिभिः ॥

14.31

उदूढवक्षःस्थगितैकदिङ्मुखो विकृष्टविस्फारितचापमण्डलः ।वितत्य पक्षद्वयम् आयतं बभौ विभुर् गुणानाम् उपरीव मध्यगः ॥

14.32

सुगेषु दुर्गेषु च तुल्यविक्रमैर् जवाद् अहंपूर्विकया यियासुभिः ।गणैर् अविच्छेदनिरुद्धम् आबभौ वनं निरुच्छ्वासम् इवाकुलाकुलम् ॥

14.33

तिरोहितश्वभ्रनिकुञ्जरोधसः समश्नुवानाः सहसातिरिक्तताम् ।किरातसैन्यैर् अपिधाय रेचिता भुवः क्षणं निम्नतयेव भेजिरे ॥

14.34

पृथूरुपर्यस्तबृहल्लतातातिर् जवानिलाघूर्णितशालचन्दना ।गणाधिपानां परितः प्रसारिणी वनान्य् अवाञ्चीव चकार संहतिः ॥

14.35

ततः सदर्पं प्रतनुं तपस्यया मदस्रुतिक्षामम् इवैकवारणम् ।परिज्वलन्तं निधनाय भूभृतां दहन्तम् आशा इव जातवेदसम् ॥

14.36

अनादरोपात्तधृतैकसायकं जये ऽनुकूले सुहृदीव सस्पृहम् ।शनैर् अपूर्णप्रतिकारपेलवे निवेशयन्तं नयने बलोदधौ ॥

14.37

निषण्णम् आपत्प्रतिकारकारणे शरासने धैर्य इवानपायिनि ।अलङ्घनीयं प्रकृताव् अपि स्थितं निवातनिष्कम्पम् इवापगापतिम् ॥

14.38

उपेयुषीं बिभ्रतम् अन्तकद्युतिं वधाद् अदूरे पतितस्य दंष्ट्रिणः ।पुरः समावेशितसत्पशुं द्विजैः पतिं पशूनाम् इव हूतम् अध्वरे ॥

14.39

निजेन नीतं विजितान्यगौरवं गभीरतां धैर्यगुणेन भूयसा ।वनोदयेनेव घनोरुवीरुधा समन्धकारीकृतम् उत्तमाचलम् ॥

14.40

महर्षभस्कन्धम् अनूनकंधरं बृहच्छिलावप्रघनेन वक्षसा ।समुज्जिहीर्षुं जगतीं महाभरां महावराहं महतो ऽर्णवाद् इव ॥

14.41

हरिन्मणिश्यामम् उदग्रविग्रहं प्रकाशमानं परिभूय देहिनः ।मनुष्यभावे पुरुषं पुरातनं स्थितं जलादर्श इवांशुमालिनम् ॥

14.42

गुरुक्रियारम्भफलैर् अलंकृतं गतिं प्रतापस्य जगत्प्रमाथिनः ।गणाः समासेदुर् अनीलवाजिनं तपात्यये तोयघना घना इव ॥

14.43

यथास्वम् आशंसितविक्रमाः पुरा मुनिप्रभावक्षततेजसः परे ।ययुः क्षणाद् अप्रतिपत्तिमूढतां महानुभावः प्रतिहन्ति पौरुषम् ॥

14.44

ततः प्रजह्रे समम् एव तत्र तैर् अपेक्षितान्योन्यबलोपपत्तिभिः ।महोदयानाम् अपि संघवृत्तितां सहायसाध्याः प्रदिशन्ति सिद्धयः ॥

14.45

किरातसैन्याद् उरुचापनोदिताः समं समुत्पेतुर् उपात्तरंहसः ।महावनाद् उन्मनसः खगा इव प्रवृत्तपत्त्रध्वनयः शिलीमुखाः ॥

14.46

गभीररन्ध्रेषु भृशं महीभृतः प्रतिस्वनैर् उन्नमितेन सानुषु ।धनुर्निनादेन जवाद् उपेयुषा विभिद्यमाना इव दध्वनुर् दिशः ॥

14.47

विधूनयन्ती गहनानि भूरुहां तिरोहितोपान्तनभोदिगन्तरा ।महीयसी वृष्टिर् इवानिलेरिता रवं वितेने गणमार्गणावलिः ॥

14.48

त्रयीम् ऋतूनाम् अनिलाशिनः सतः प्रयाति पोषं वपुषि प्रहृष्यतः ।रणाय जिष्णोर् विदुषेव सत्वरं घनत्वम् ईये शिथिलेन वर्मणा ॥

14.49

पतत्सु शस्त्रेषु वितत्य रोदसी समन्ततस् तस्य धनुर् दुधूषतः ।सरोषम् उल्केव पपात भीषणा बलेषु दृष्टिर् विनिपातशंसिनी ॥

14.50

दिशः समूहन्न् इव विक्षिपन्न् इव प्रभां रवेर् आकुलयन्न् इवानिलम् ।मुनिश् चचाल क्षयकालदारुणः क्षितिं सशैलां चलयन्न् इवेषुभिः ॥

14.51

विमुक्तम् आशंसितशत्रुनिर्जयैर् अनेकम् एकावसरं वनेचरैः ।स निर्जघानायुधम् अन्तरा शरैः क्रियाफलं काल इवातिपातितः ॥

14.52

गतैः परेषाम् अविभावनीयतां निवारयद्भिर् विपदं विदूरगैः ।भृशं बभूवोपचितो बृहत्फलैः शरैर् उपायैर् इव पाण्डुनन्दनः ॥

14.53

दिवः पृथिव्याः ककुभां नु मण्डलात् पतन्ति बिम्बाद् उत तिग्मतेजसः ।सकृद् विकृष्टाद् अथ कार्मुकान् मुनेः शराः शरीराद् इति ते ऽभिमेनिरे ॥

14.54

गणाधिपानाम् अविधाय निर्गतैः परासुतां मर्मविदारणैर् अपि ।जवाद् अतीये हिमवान् अधोमुखैः कृतापराधैर् इव तस्य पत्त्रिभिः ॥

14.55

द्विषां क्षतीर् याः प्रथमे शिलामुखा विभिद्य देहावरणानि चक्रिरे ।न तासु पेते विशिखैः पुनर् मुनेर् अरुंतुदत्वं महतां ह्य् अगोचरः ॥

14.56

समुज्झिता यावदराति निर्यती सहैव चापान् मुनिबाणसंहतिः ।प्रभा हिमांशोर् इव पङ्कजावलिं निनाय संकोचम् उमापतेश् चमूम् ॥

14.57

अजिह्मम् ओजिष्ठम् अमोघम् अक्लमं क्रियासु बह्वीषु पृथङ् नियोजितम् ।प्रसेहिरे सादयितुं न सादिताः शरौघम् उत्साहम् इवास्य विद्विषः ॥

14.58

शिवध्वजिन्यः प्रतियोधम् अग्रतः स्फुरन्तम् उगेषुमयूखमालिनम् ।तम् एकदेशस्थम् अनेकदेशगा निदध्युर् अर्कं युगपत् प्रजा इव ॥

14.59

मुनेः शरौघेण तदुग्ररंहसा बलं प्रकोपाद् इव विष्वग् आयता ।विधूनितं भ्रान्तिम् इयाय सङ्गिनीं महानिलेनेव निदाघजं रजः ॥

14.60

तपोबलेनैष विधाय भूयसीस् तनूर् अदृश्याः स्विद् इषून् निरस्यति ।अमुष्य मायाविहतं निहन्ति नः प्रतीपम् आगत्य किम् उ स्वम् आयुधम् ॥

14.61

हृता गुणैर् अस्य भयेन वा मुनेस् तिरोहिताः स्वित् प्रहरन्ति देवताः ।कथं न्व् अमी संततम् अस्य सायका भवन्त्य् अनेके जलधेर् इवोर्मयः ॥

14.62

जयेन कच्चिद् विरमेद् अयं रणाद् भवेद् अपि स्वस्ति चराचराय वा ।तताप कीर्णा नृपसूनुमार्गणैर् इति प्रतर्काकुलिता पताकिनी ॥

14.63

अमर्षिणा कृत्यम् इव क्षमाश्रयं मदोद्धतेनेव हितं प्रियं वचः ।बलीयसा तद् विधिनेव पौरुषं बलं निरस्तं न रराज जिष्णुना ॥

14.64

प्रतिदिशं प्लवगाधिपलक्ष्मणा विशिखसंहतितापितमूर्तिभिः ।रविकरग्लपितैर् इव वारिभिः शिवबलैः परिमण्डलता दधे ॥

14.65

प्रविततशरजालच्छन्नविश्वान्तराले विधुवति धनुर् आविर् मण्डलं पाण्डुसूनौ ।कथम् अपि जयलक्ष्मीर् भूतभूता विहातुं विषमनयनसेनापक्षपातं विषेहे ॥

15.1

अथ भूतानि वार्त्रघ्नशरेभ्यस् तत्र तत्रसुः ।भेजे दिशः परित्यक्तमहेष्वासा च सा चमूः ॥

15.2

अपश्यद्भिर् इवेशानं रणान् निववृते गणैः ।मुह्यतीव हि कृच्छ्रेषु सम्भ्रमज्वलितं मनः ॥

15.3

खण्डिताशंसया तेषां पराङ्मुखतया तया ।आविवेश कृपा केतौ कृतोच्चैर्वानरं नरम् ॥

15.4

आस्थाम् आलम्ब्य नीतेषु वशं क्षुद्रेष्व् अरातिषु ।व्यक्तिम् आयाति महतां माहात्म्यम् अनुकम्पया ॥

15.5

स सासिः सासुसूः सासो येयायेयाययाययः ।ललौ लीलां ललो ऽलोलः शशीशशिशुशीः शशन् ॥

15.6

त्रासजिह्मं यतश् चैतान् मन्दम् एवान्वियाय सः ।नातिपीडयितुं भग्नान् इच्छन्ति हि महौजसः ॥

15.7

अथाग्रे हसता साचिस्थितेन स्थिरकीर्तिना ।सेनान्या ते जगदिरे किंचिदायस्तचेतसा ॥

15.8

मा विहासिष्ट समरं समरन्तव्यसंयतः ।क्षतं क्षुण्णासुरगणैर् अगणैर् इव किं यशः ॥

15.9

विवस्वदंशुसंश्लेषद्विगुणीकृततेजसः ।अमी वो मोघम् उद्गूर्णा हसन्तीव महासयः ॥

15.10

वने ऽवने वनसदां मार्गं मार्गम् उपेयुषाम् ।वाणैर् बाणैः समासक्तं शङ्के ऽशं केन शाम्यति ॥

15.11

पातितोत्तुङ्गमाहात्म्यैः संहृतायतकीर्तिभिः ।गुर्वीं काम् आपदं हन्तुं कृतम् आवृत्तिसाहसम् ॥

15.12

नासुरो ऽयं न वा नागो धरसंस्थो न राक्षसः ।ना सुखो ऽयं नवाभोगो धरणिस्थो हि राजसः ॥

15.13

मन्दम् अस्यन्न् इषुलतां घृणया मुनिर् एष वः ।प्रणुदत्य् आगतावज्ञं जघनेषु पशून् इव ॥

15.14

न नोननुन्नो ऽनुन्नेनो न ना नानानना ननु ।नुन्नो ऽनुन्नो न नुन्नेनो नानेनानुन्ननुन् न नुत् ॥

15.15

वरं कृतध्वस्तगुणाद् अत्यन्तम् अगुणः पुमान् ।प्रकृत्या ह्य् अमणिः श्रेयान् नालंकारश् च्युतोपलः ॥

15.16

स्यन्दना नो चतुरगाः सुरेभा वाविपत्तयः ।स्यन्दना नो च तुरगाः सुरेभावा विपत्तयः ॥

15.17

भवद्भिर् अधुनारातिपरिहापितपौरुषैः ।ह्रदैर् इवार्कनिष्पीतैः प्राप्तः पङ्को दुरुत्सहः ॥

15.18

वेत्रशाककुजे शैले ऽलेशैजे ऽकुकशात्रवे ।यात किं विदिशो जेतुं तुञ्जेशो दिवि किंतया ॥

15.19

अयं वः क्लैब्यम् आपन्नान् दृष्टपृष्ठान् अरातिना ।इच्छतीशश् च्युताचारान् दारान् इव निगोपितुम् ॥

15.20

ननु हो मथना राघो घोरा नाथमहो नु न ।तयदातवदा भीमा माभीदा बत दायत ॥

15.21

किं त्यक्तापास्तदेवत्वमानुष्यकपरिग्रहैः ।ज्वलितान्यगुणैर् गुर्वी स्थिता तेजसि मान्यता ॥

15.22

निशितासिरतो ऽभीको न्येजते ऽमरणा रुचा ।सारतो न विरोधी नः स्वाभासो भरवान् उत ॥

15.23

तनुवारभसो भास्वान् अधीरो ऽविनतोरसा ।चारुणा रमते जन्ये को ऽभीतो रसिताशिनि ॥

15.24

निर्भिन्नपातिताश्वीयनिरुद्धरथवर्त्मनि ।हतद्विपनगष्ठ्यूतरुधिराम्बुनदाकुले ॥

15.25

देवाकानिनि कावादे वाहिकास्वस्वकाहि वा ।काकारेभभरे काका निस्वभव्यव्यभस्वनि ॥

15.26

प्रनृत्तशववित्रस्ततुरगाक्षिप्तसारथौ ।मारुतापूर्णतूणीरविक्रुष्टहतसादिनि ॥

15.27

ससत्त्वरतिदे नित्यं सदरामर्षनाशिनि ।त्वराधिककसन्नादे रमकत्वम् अकर्षति ॥

15.28

आसुरे लोकवित्रासविधायिनि महाहवे ।युष्माभिर् उन्नतिं नीतं निरस्तम् इह पौरुषम् ॥

15.29

इति शासति सेनान्यां गच्छतस् तान् अनेकधा ।निषिध्य हसता किंचित् तत्र तस्थे ऽन्धकारिणा ॥

15.30

मुनीषुदहनातप्तांल् लज्जया निविवृत्सतः ।शिवः प्रह्लादयामास तान् निषेधहिमाम्बुना ॥

15.31

दूनास् ते ऽरिबलाद् ऊना निरेभा बहु मेनिरे ।भीताः शितशराभीताः शंकरं तत्र शंकरम् ॥

15.32

महेषुजलधौ शत्रोर् वर्तमाना दुरुत्तरे ।प्राप्य पारम् इवेशानम् आशश्वास पताकिनी ॥

15.33

स बभार रणापेतां चमूं पश्चाद् अवस्थिताम् ।पुरः सूर्याद् उपावृत्तां छायाम् इव महातरुः ॥

15.34

मुञ्चतीशे शराञ् जिष्णौ पिनाकस्वनपूरितः ।दध्वान ध्वनयन्न् आशाः स्फुटन्न् इव धराधरः ॥

15.35

तद्गणा ददृशुर् भीमं चित्रसंस्था इवाचलाः ।विस्मयेन तयोर् युद्धं चित्रसंस्था इवाचलाः ॥

15.36

परिमोहयमाणेन शिक्षालाघवलीलया ।जैष्णवी विशिखश्रेणी परिजह्रे पिनाकिना ॥

15.37

अवद्यन् पत्रिणः शम्भोः सायकैर् अवसायकैः ।पाण्डवः परिचक्राम शिक्षया रणशिक्षया ॥

15.38

चारचुञ्चुश् चिरारेची चञ्चच्चीररुचा रुचः ।चचार रुचिरश् चारु चारैर् आचारचञ्चुरः ॥

15.39

स्फुरत्पिशङ्गमौर्वीकं धुनानः स बृहद्धनुः ।धृतोल्कानलयोगेन तुल्यम् अंशुमता बभौ ॥

15.40

पार्थबाणाः पशुपतेर् आवव्रुर् विशिखावलिम् ।पयोमुच इवारन्ध्राः सावित्रीम् अंशुसंहतिम् ॥

15.41

शरवृष्टिं विधूयोर्वीम् उदस्तां सव्यसाचिना ।रुरोध मार्गणैर् मार्गं तपनस्य त्रिलोचनः ॥

15.42

तेन व्यातेनिरे भीमा भीमार्जनफलाननाः ।न नानुकम्प्य विशिखाः शिखाधरजवाससः ॥

15.43

द्युवियद्गामिनी तारसंरावविहतश्रुतिः ।हैमीषुमाला शुशुभे विद्युताम् इव संहतिः ॥

15.44

विलङ्घ्य पत्रिणां पङ्क्तिं भिन्नः शिवशिलीमुखैः ।ज्यायो वीर्यं समाश्रित्य न चकम्पे कपिध्वजः ॥

15.45

जगतीशरणे युक्तो हरिकान्तः सुधासितः ।दानवर्षीकृताशंसो नागराज इवाबभौ ॥

15.46

विफलीकृतयत्नस्य क्षतबाणस्य शम्भुना ।गाण्डीवधन्वनः खेभ्यो निश्चचार हुताशनः ॥

15.47

स पिशङ्गजटावलिः किरन्न् उरुतेजः परमेण मन्युना ।ज्वलितौषधिजातवेदसा हिमशैलेन समं विदिद्युते ॥

15.48

शतशो विशिखान् अवद्यते भृशम् अस्मै रणवेगशालिने ।प्रथयन्न् अनिवार्यवीर्यतां प्रजिगायेषुम् अघातुकं शिवः ॥

15.49

शम्भो धनुर्मण्डलतः प्रवृत्तं तं मण्डलाद् अंशुम् इवांशुभर्तुः ।निवारयिष्यन् विदधे सिताश्वः शिलीमुखच्छायवृतां धरित्रीम् ॥

15.50

घनं विदार्यार्जुनबाणपूगं ससारबाणो ऽयुग् अलोचनस्य ।घनं विदार्यार्जुनबाणपूगं ससार बाणो ऽयुगलोचनस्य ॥

15.51

रुजन् परेषून् बहुधाशुपातिनो मुहुः शरौघैर् अपवारयन् दिशः ।चलाचलो ऽनेक इव क्रियावशान् महर्षिसंघैर् बुबुधे धनंजयः ॥

15.52

विकाशम् ईयुर् जगतीशमार्गणा विकाशम् ईयुर् जगतीशमार्गणाः ।विकाशम् ईयुर् जगतीशमार्गणा विकाशम् ईयुर् जगतीशमार्गणाः ॥

15.53

सम्पश्यताम् इति शिवेन वितायमानं लक्ष्मीवतः क्षितिपतेस् तनयस्य वीर्यम् ।अङ्गान्य् अभिन्नम् अपि तत्त्वविदां मुनीनां रोमाञ्चम् अञ्चिततरं बिभराम्बभूवुः ॥

16.1

ततः किराताधिपतेर् अलघ्वीम् आजिक्रियां वीक्ष्य विवृद्धमन्युः ।स तर्कयामास विविक्ततर्कश् चिरं विचिन्वन्न् इति कारणानि ॥

16.2

मदस्रुतिश्यामितगण्डलेखाः क्रामन्ति विक्रान्तनराधिरूढाः ।सहिष्णवो नेह युधाम् अभिज्ञा नागा नगोच्छ्रायम् इवाक्षिपन्तः ॥

16.3

विचित्रया चित्रयतेव भिन्नां रुचं रवेः केतनरत्नभासा ।महारथौघेन न संनिरुद्धाः पयोदमन्द्रध्वनिना धरित्री ॥

16.4

समुल्लसत्प्रासमहोर्मिमालं परिस्फुरच्चामरफेनपङ्क्ति ।विभिन्नमर्यादम् इहातनोति नाश्वीयम् आशा जलधेर् इवाम्भः ॥

16.5

हताहतेत्य् उद्धतभीष्मघोषैः समुज्झिता योद्धृभिर् अभ्यमित्रम् ।न हेतयः प्राप्ततडित्त्विषः खे विवस्वदंशुज्वलिताः पतन्ति ॥

16.6

अभ्यायतः संततधूमधूम्रं व्यापि प्रभाजालम् इवान्तकस्य ।रजः प्रतूर्णाश्वरथाङ्गनुन्नं तनोति न व्योमनि मातरिश्वा ॥

16.7

भूरेणुना रासभधूसरेण तिरोहिते वर्त्मनि लोचनानाम् ।नास्त्य् अत्र तेजस्विभिर् उत्सुकानाम् अह्नि प्रदोषः सुरसुन्दरीणाम् ॥

16.8

रथाङ्गसंक्रीडितम् अश्वहेषा बृहन्ति मत्तद्विपबृंहितानि ।संघर्षयोगाद् इव मूर्छितानि ह्रादं निगृह्णन्ति न दुन्दुभीनाम् ॥

16.9

अस्मिन् यशःपौरुषलोलुपानाम् अरातिभिः प्रत्युरसं क्षतानाम् ।मूर्छान्तरायं मुहुर् उच्छिनत्ति नासारशीतं करिशीकराम्भः ॥

16.10

असृङ्नदीनाम् उपचीयमानैर् विदारयद्भिः पदवीं ध्वजिन्याः ।उच्छ्रायम् आयान्ति न शोणितौघैः पङ्कैर् इवाश्यानघनैस् तटानि ॥

16.11

परिक्षते वक्षसि दन्तिदन्तैः प्रियाङ्कशीता नभसः पतन्ती ।नेह प्रमोहं प्रियसाहसानां मन्दारमाला विरलीकरोति ॥

16.12

निषादिसंनाहमणिप्रभौघे परीयमाणे करिशीकरेण ।अर्कत्विषोन्मीलितम् अभ्युदेति न खण्डम् आखण्डलकार्मुकस्य ॥

16.13

महीभृता पक्षवतेव भिन्ना विगाह्य मध्यं परवारणेन ।नावर्तमाना निनदन्ति भीमम् अपां निधेर् आप इव ध्वजिन्यः ॥

16.14

महारथानां प्रतिदन्त्यनीकम् अधिस्यदस्यन्दनम् उत्थितानाम् ।आमूललूनैर् अतिमन्युनेव मातङ्गहस्तैर् व्रियते न पन्थाः ॥

16.15

धृतोत्पलापीड इव प्रियायाः शिरोरुहाणां शिथिलः कलापः ।न बर्हभारः पतितस्य शङ्कोर् निषादिवक्षःस्थलम् आतनोति ॥

16.16

उज्झत्सु संहार इवास्तसंख्यम् अह्नाय तेजस्विषु जीवितानि ।लोकत्रयास्वादनलोलजिह्वं न व्याददात्य् आननम् अत्र मृत्युः ॥

16.17

इयं च दुर्वारमहारथानाम् आक्षिप्य वीर्यं महतां बलानाम् ।शक्तिर् ममावस्यति हीनयुद्धे सौरीव ताराधिपधाम्नि दीप्तिः ॥

16.18

माया स्विद् एषा मतिविभ्रमो वा ध्वस्तं नु मे वीर्यम् उताहम् अन्यः ।गाण्डीवमुक्ता हि यथा पुरा मे पराक्रमन्ते न शराः किराते ॥

16.19

पुंसः पदं मध्यमम् उत्तमस्य द्विधेव कुर्वन् धनुषः प्रणादैः ।नूनं तथा नैषा यथास्य वेषः प्रच्छन्नम् अप्य् ऊहयते हि चेष्टा ॥

16.20

धनुः प्रबन्धध्वनितं रुषेव सकृद् विकृष्टा विततेव मौर्वी ।संधानम् उत्कर्षम् इव व्युदस्य मुष्टेर् असम्भेद इवापवर्गे ॥

16.21

अंसाव् अवष्टब्धनतौ समाधिः शिरोधराया रहितप्रयासः ।धृता विकारांस् त्यजता मुखेन प्रसादलक्ष्मीः शशलाञ्छनस्य ॥

16.22

प्रहीयते कार्यवशागतेषु स्थानेषु विष्टब्धतया न देहः ।स्थितप्रयातेषु ससौष्ठवश् च लक्ष्येषु पातः सदृशः शराणाम् ॥

16.23

परस्य भूयान् विवरे ऽभियोगः प्रसह्य संरक्षणम् आत्मरन्ध्रे ।भीष्मे ऽप्य् असम्भाव्यम् इदं गुरौ वा न सम्भवत्य् एव वनेचरेषु ॥

16.24

अप्राकृतस्याहवदुर्मदस्य निवार्यम् अस्यास्त्रबलेन वीर्यम् ।अल्पीयसो ऽप्य् आमयतुल्यवृत्तेर् महापकाराय रिपोर् विवृद्धिः ॥

16.25

स सम्प्रधार्यैवम् अहार्यसारः सारं विनेष्यन् सगणस्य शत्रोः ।प्रस्वापनास्त्रं द्रुतम् आजहार ध्वान्तं घनानद्ध इवार्धरात्रः ॥

16.26

प्रसक्तदावानलधूमधूम्रा निरुन्धती धाम सहस्ररश्मेः ।महावनानीव महातमिस्रा छाया ततानेशबलानि काली ॥

16.27

आसादिता तत्प्रथमं प्रसह्य प्रगल्भतायाः पदवीं हरन्ती ।सभेव भीमा विदधे गणानां निद्रा निरासं प्रतिभागुणस्य ॥

16.28

गुरुस्थिराण्य् उत्तमवंशजत्वाद् विज्ञातसाराण्य् अनुशीलनेन ।केचित् समाश्रित्य गुणान् वितानि सुहृत्कुलानीव धनूंषि तस्थुः ॥

16.29

कृतान्तदुर्वृत्त इवापरेषां पुरः प्रतिद्वन्द्विनि पाण्डवास्त्रे ।अतर्कितं पाणितलान् निपेतुः क्रियाफलानीव तदायुधानि ॥

16.30

अंसस्थलैः केचिद् अभिन्नधैर्याः स्कन्धेषु संश्लेषवतां तरूणाम् ।मदेन मीलन्नयनाः सलीलं नागा इव स्रस्तकरा निषेदुः ॥

16.31

तिरोहितेन्दोर् अथ शम्भुमूर्ध्नः प्रणम्यमानं तपसां निवासैः ।सुमेरुशृङ्गाद् इव बिम्बम् आर्कं पिशङ्गम् उच्चैर् उदियाय तेजः ॥

16.32

छायां विनिर्धूय तमोमयीं तां तत्त्वस्य संवित्तिर् इवापविद्याम् ।ययौ विकासं द्युतिर् इन्दुमौलेर् आलोकम् अभ्यादिशती गणेभ्यः ॥

16.33

त्विषां ततिः पाटलिताम्बुवाहा सा सर्वतः पूर्वसरीव संध्या ।निनाय तेषां द्रुतम् उल्लसन्ती विनिद्रतां लोचनपङ्कजानि ॥

16.34

पृथग्विधान्य् अस्त्रविरामबुद्धाः शस्त्राणि भूयः प्रतिपेदिरे ते ।मुक्ता वितानेन बलाहकानां ज्योतींषि रम्या इव दिग्विभागाः ॥

16.35

द्यौर् उन्ननामेव दिशः प्रसेदुः स्फुटं विसस्रे सवितुर् मयूखैः ।क्षयं गतायाम् इव यामवत्यां पुनः समीयाय दिनं दिनश्रीः ॥

16.36

महास्त्रदुर्गे शिथिलप्रयत्नं दिग्वारणेनेव परेण रुग्णे ।भुजङ्गपाशान् भुजवीर्यशाली प्रबन्धनाय प्रजिघाय जिष्णुः ॥

16.37

जिह्वाशतान्य् उल्लसयन्त्य् अजस्रं लसत्तडिल्लोलविषानलानि ।त्रासान् निरस्तां भुजगेन्द्रसेना नभश्चरैस् तत्पदवीं विवव्रे ॥

16.38

दिङ्नागहस्ताकृतिम् उद्वहद्भिर् भोगैः प्रशस्तासितरत्ननीलैः ।रराज सर्पावलिर् उल्लसन्ती तरङ्गमालेव नभोर्णवस्य ॥

16.39

निःश्वासधूमैः स्थगितांशुजालं फणावताम् उत्फणमण्डलानाम् ।गच्छन्न् इवास्तं वपुर् अभ्युवाह विलोचनानां सुखम् उष्णरश्मिः ॥

16.40

प्रतप्तचामीकरभासुरेण दिशः प्रकाशेन पिशङ्गयन्त्यः ।निश्चक्रमुः प्राणहरेक्षणानां ज्वाला महोल्का इव लोचनेभ्यः ॥

16.41

आक्षिप्तसम्पातम् अपेतशोभम् उद्वह्नि धूमाक्कुलदिग्विभागम् ।वृतं नभो भोगिकुलैर् अवस्थां परोपरुद्धस्य पुरस्य भेजे ॥

16.42

तम् आशु चक्षुःश्रवसां समूहं मन्त्रेण तार्क्ष्योदयकारणेन ।नेता नयेनेव परोपजापं निवारयामास पतिः पशूनाम् ॥

16.43

प्रतिघ्नतीभिः कृतमीलितानि द्युलोकभाजाम् अपि लोचनानि ।गरुत्मता संहतिभिर् विहायः क्षणप्रकाशाभिर् इवाववतेने ॥

16.44

ततः सुपर्णव्रजपक्षजन्मा नानागतिर् मण्डलयञ् जवेन ।जरत्तृणानीव वियन् निनाय वनस्पतीनां गहनानि वायुः ॥

16.45

मनःशिलाभङ्गनिभेन पश्चान् निरुध्यमानं निकरेण भासाम् ।व्यूढैर् उरोभिश् च विनुद्यमानं नभः ससर्पेव पुरः खगानाम् ॥

16.46

दरीमुखैर् आसवरागताम्रं विकासि रुक्मच्छदधाम पीत्वा ।जवानिलाघूर्णितसानुजालो हिमाचलः क्षीब इवाचकम्पे ॥

16.47

प्रवृत्तनक्तंदिवसंधिदीप्तैर् नभस्तलं गां च पिशङ्गयद्भिः ।अन्तर्हितार्कैः परितः पतद्भिश् छायाः समाचिक्षिपिरे वनानाम् ॥

16.48

स भोगसंघः शमम् उग्रधाम्नां सैन्येन निन्ये विनतासुतानाम् ।महाध्वरे विध्यपचारदोषः कर्मान्तरेणेव महोदयेन ॥

16.49

साफल्यम् अस्त्रे रिपुपौरुषस्य कृत्वा गते भाग्य इअवापवर्गम् ।अनिन्धनस्य प्रसभं समन्युः समाददे ऽस्त्रं ज्वलनस्य जिष्णुः ॥

16.50

ऊर्ध्वं तिरश्चीनम् अधश् च कीर्णैर् ज्वालासटैर् लङ्घितमेघपङ्क्तिः ।आयस्तसिंहाकृतिर् उत्पपात प्राण्यन्तम् इच्छन्न् इव जातवेदाः ॥

16.51

भित्त्वेव भाभिः सवितुर् मयूखाञ् जज्वाल विष्वग् विसृतस्फुलिङ्गः ।विदीर्यमाणाश्मनिनादधीरं ध्वनिं वितन्वन्न् अकृशः कृशानुः ॥

16.52

चयान् इवाद्रीन् इव तुङ्गशृङ्गान् क्वचित् पुराणीव हिरण्मयानि ।महावनानीव च किंशुकानाम् अत्तान वह्निः पवनानुवृत्त्या ॥

16.53

मुहुश् चलत्पल्लवलोहिनीभिर् उच्चैः शिखाभिः शिखिनो ऽवलीढाः ।तलेषु मुक्ताविशदा बभूवुः सान्द्राञ्जनश्यामरुचः पयोदाः ॥

16.54

लिलिक्षतीव क्षयकालरौद्रे लोकं विलोलार्चिषि रोहिताश्वे ।पिनाकिना हूतमहाम्बुवाहम् अस्त्रं पुनः पाशभृतः प्रणिन्ये ॥

16.55

ततो धरित्रीधरतुल्यरोधसस् तडिल्लतालिङ्गितनीलमूर्तयः ।अधोमुखाकाशसरिन्निपातिनीर् अपः प्रसक्तं मुमुचुः पयोमुचः ॥

16.56

पराहतध्वस्तशिखे शिखावतो वपुष्य् अधिक्षिप्तसमिद्धतेजसि ।कृतास्पदास् तप्त इवायसि ध्वनिं पयोनिपाताः प्रथमे वितेनिरे ॥

16.57

महानले भिन्नसिताभ्रपातिभिः समेत्य सद्यः कथनेन फेनताम् ।व्रजद्भिर् आर्द्रेन्धनवत् परिक्षयं जलैर् वितेने दिवि धूमसंततिः ॥

16.58

स्वकेतुभिः पाण्डुरनीलपाटलैः समागताः शक्रधनुःप्रभाभिदः ।असंस्थिताम् आदधिरे विभावसोर् विचित्रचीनांशुकचारुतां त्विषः ॥

16.59

जलौघसंमूर्छनमूर्छितस्वनः प्रसक्तविद्युल्लसितैधितद्युतिः ।प्रशान्तिम् एष्यन् धृतधूममण्डलो बभूव भूयान् इव तत्र पावकः ॥

16.60

प्रवृद्धसिन्धूर्मिचयस्थवीयसां चयैर् विभिन्नाः पयसां प्रपेदिरे ।उपात्तसंध्यारुचिभिः सरूपतां पयोदविच्छेदलवैः कृशानवः ॥

16.61

उपैत्य् अनन्तद्युतिर् अप्य् असंशयं विभिन्नमूलो ऽनुदयाय संक्षयम् ।तथा हि तोयौघविभिन्नसंहतिः स हव्यवाहः प्रययौ पराभवम् ॥

16.62

अथ विहितविधेयैर् आशु मुक्ता वितानैर् असितनगनितम्बश्यामभासां घनानाम् ।विकसदमलधाम्नां प्राप नीलोत्पलानां श्रियम् अधिकविशुद्धां वह्निदाहाद् इव द्यौः ॥

16.63

इति विविधम् उदासे सव्यसाची यद् अस्त्रं बहुसमरनयज्ञः सादयिष्यन्न् अरातिम् ।विधिर् इव विपरीतः पौरुषं न्यायवृत्तेः सपदि तद् उपनिन्ये रिक्ततां नीलकण्ठः ॥

16.64

वीतप्रभावतनुर् अप्य् अतनुप्रभावः प्रत्याचकाङ्क्ष जयिनीं भुजवीर्यलक्ष्मीम् ।अस्त्रेषु भूतपतिनापहृतेषु जिष्णुर् वर्षिष्यता दिनकृतेव जलेषु लोकः ॥

17.1

अथापदाम् उद्धरणक्षमेषु मित्रेष्व् इवास्त्रेषु तिरोहितेषु ।धृतिं गुरुश्रीर् गुरुणाभिपुष्यन् स्वपौरुषेणेव शरासनेन ॥

17.2

भूरिप्रभावेण रणाभियोगात् प्रीतो विजिह्मश् च तदीयवृद्ध्या ।स्पष्टो ऽप्य् अविस्पष्टवपुःप्रकाशः सर्पन्महाधूम इवाद्रिवह्निः ॥

17.3

तेजः समाश्रित्य परैर् अहार्यं निजं महन्मित्रम् इवोरुधैर्यम् ।आसादयन्न् अस्खलितस्वभावं भीमे भुजालम्बम् इवारिदुर्गे ॥

17.4

वंशोचितत्वाद् अभिमानवत्या सम्प्राप्तया सम्प्रियताम् असुभ्यः ।समक्षम् आदित्सितया परेण वध्वेव कीर्त्या परितप्यमानः ॥

17.5

पतिं नगानाम् इव बद्धमूलम् उन्मूलयिष्यंस् तरसा विपक्षम् ।लघुप्रयत्नं निगृहीतवीर्यस् त्रिमार्गगावेग इवेश्वरेण ॥

17.6

संस्कारवत्त्वाद् रमयत्सु चेतः प्रयोगशिक्षागुणभूषणेषु ।जयं यथार्थेषु शरेषु पार्थः शब्देषु भावार्थम् इवाशशंसे ॥

17.7

भूयः समाधानविवृद्धतेजा नैवं पुरा युद्धम् इति व्यथावान् ।स निर्ववामास्रम् अमर्षनुन्नं विषं महानाग इवेक्षणाभ्याम् ॥

17.8

तस्याहवायासविलोलमौलेः संरम्भताम्रायतलोचनस्य ।निर्वापयिष्यन्न् इव रोषतप्तं प्रस्नापयामास मुखं निदाघः ॥

17.9

क्रोधान्धकारान्तरितो रणाय भ्रूभेदरेखाः स बभार तिस्रः ।घनोपरुद्धः प्रभवाय वृष्टेर् ऊर्ध्वांशुराजीर् इव तिग्मरश्मिः ॥

17.10

स प्रध्वनय्याम्बुदनादि चापं हस्तेन दिङ्नाग इवाद्रिशृङ्गम् ।बलानि शम्भोर् इषुभिस् तताप चेतांसि चिन्ताभिर् इवाशरीरः ॥

17.11

सद्वादितेवाभिनिविष्टबुद्धौ गुणाभ्यसूयेव विपक्षपाते ।अगोचरे वाग् इव चोपरेमे शक्तिः शराणां शितिकण्ठकाये ॥

17.12

उमापतिं पाण्डुसुतप्रणुन्नाः शिलीमुखा न व्यथयांबभूवुः ।अभ्युत्थितस्याद्रिपतेर् नितम्बम् अर्कस्य पादा इव हैमनस्य ॥

17.13

सम्प्रीयमाणो ऽनुबभूव तीव्रं पराक्रमं तस्य पतिर् गणानाम् ।विषाणभेदं हिमवान् असह्यं वप्रानतस्येव सुरद्विपस्य ॥

17.14

तस्मै हि भारोद्धरणे समर्थं प्रदास्यता बाहुम् इव प्रतापम् ।चिरं विषेहे ऽभिभवस् तदानीं स कारणानाम् अपि कारणेन ॥

17.15

प्रत्याहतौजाः कृतसत्त्ववेगः पराक्रमं ज्यायसि यस् तनोति ।तेजांसि भानोर् इव निष्पतन्ति यशांसि वीर्यज्वलितानि तस्य ॥

17.16

दृष्टावदानाद् व्यथते ऽरिलोकः प्रध्वंसम् एति व्यथिताच् च तेजः ।तेजोविहीनं विजहाति दर्पः शान्तार्चिषं दीपम् इव प्रकाशः ॥

17.17

ततः प्रयात्यस्तमदावलेपः स जय्यतायाः पदवीं जिगीषोः ।गन्धेन जेतुः प्रमुखागतस्य प्रतिद्विपस्येव मतङ्गजौघः ॥

17.18

एवं प्रतिद्वन्द्विषु तस्य कीर्तिं मौलीन्दुलेखाविशदां विधास्यन् ।इयेष पर्यायजयावसादां रणक्रियां शम्भुर् अनुक्रमेण ॥

17.19

मुनेर् विचित्रैर् इषुभिः स भूयान् निन्ये वशं भूतपतेर् बलौघः ।सहात्मलाभेन समुत्पतद्भिर् जातिस्वभावैर् इव जीवलोकः ॥

17.20

वितन्वतस् तस्य शरान्धकारं त्रस्तानि सैन्यानि रवं निशेमुः ।प्रवर्षतः संततवेपथूनि क्षपाघनस्येव गवां कुलानि ॥

17.21

स सायकान् साध्वसविप्लुतानां क्षिपन् परेषाम् अतिसौष्ठवेन ।शशीव दोषावृतलोचनानां विभिद्यमानः पृथग् आबभासे ॥

17.22

क्षोभेण तेनाथ गणाधिपानां भेदं ययव् आकृतिर् ईश्वरस्य ।तरङ्गकम्पेन महाह्रदानां छायामयस्येव दिनस्य कर्तुः ॥

17.23

प्रसेदिवांसं न तम् आप कोपः कुतः परस्मिन् पुरुषे विकारः ।आकारवैषम्यम् इदं च भेजे दुर्लक्ष्यचिह्ना महतां हि वृत्तिः ॥

17.24

विस्फार्यमाणस्य ततो भुजाभ्यां भूतानि भर्त्रा धनुर् अन्तकस्य ।भिन्नाकृतिं ज्यां ददृशुः स्फुरन्तीं क्रुद्धस्य जिह्वाम् इव तक्षकस्य ॥

17.25

स्व्यापसव्यध्वनितोग्रचापं पार्थः किराताधिपम् आशशङ्के ।पर्यायसम्पादितकर्णतालं यन्ता गजं व्यालम् इवापराद्धः ॥

17.26

निजघ्निरे तस्य हरेषुजालैः पतन्ति वृन्दानि शिलीमुखानाम् ।ऊर्जस्विभिः सिन्धुमुखागतानि यादांसि यादोभिर् इवाम्बुराशेः ॥

17.27

विभेदम् अन्तः पदवीनिरोधं विध्वंसनं चाविदितप्रयोगः ।नेतारिलोकेषु करोति यद् यत् तत् तच् चकारास्य शरेषु शम्भुः ॥

17.28

सोढावगीतप्रथमायुधस्य क्रोधोज्झितैर् वेगितया पतद्भिः ।छिन्नैर् अपि त्रासितवाहिनीकैः पेते कृतार्थैर् इव तस्य बाणैः ॥

17.29

अलंकृतानाम् ऋजुतागुणेन गुरूपदिष्टां गतिम् आस्थितानाम् ।सताम् इवापर्वणि मार्गणानां भङ्गः स जिष्णोर् धृतिम् उन्ममाथ ॥

17.30

बाणच्छिदस् ते विशिखाः स्मरारेर् अवाङ्मुखीभूतफलाः पतन्तः ।अखण्डितं पाण्डवसायकेभ्यः कृतस्य सद्यः प्रतिकारम् आपुः ॥

17.31

चित्रीयमाणान् अतिलाघवेन प्रमाथिनस् तान् भवमार्गणानाम् ।समाकुलाया निचखान दूरं बाणान् ध्वजिन्या हृदयेष्व् अरातिः ॥

17.32

तस्यातियत्नाद् अतिरिच्यमाने पराक्रमे ऽन्योन्यविशेषणेन ।हन्ता पुरां भूरि पृषत्कवर्षं निरास नैदाघ इवाम्बु मेघः ॥

17.33

अनामृशन्तः क्वचिद् एव मर्म प्रियैषिणानुप्रहिताः शिवेन ।सुहृत्प्रयुक्ता इव नर्मवादाः शरा मुनेः प्रीतिकरा बभूवुः ॥

17.34

अस्त्रैः समानाम् अतिरेकिणीं वा पश्यनीषूणाम् अपि तस्य शक्तिम् ।विषादवक्तव्यबलः प्रमाथी स्वम् आललम्बे बलम् इन्दुमौलिः ॥

17.35

तपस् तपोवीर्यसमुद्धतस्य पारं यियासोः समरार्णवस्य ।महेषुजालान्य् अखिलानि जिष्णोर् अर्कः पयांसीव समाचचाम ॥

17.36

रिक्ते सविस्रम्भम् अथ्+अर्जुनस्य निषङ्गवक्त्रे निपतात पाणिः ।अन्यद्विपापीतजले सतर्षं मतङ्गजस्येव नगाश्मरन्ध्रे ॥

17.37

च्युते स तस्मिन्न् इषुधौ शरार्थाद् ध्वस्तार्थसारे सहसेव बन्धौ ।तत्कालमोघप्रणयः प्रपेदे निर्वाच्यताकाम इवाभिमुख्यम् ॥

17.38

आघट्टयामास गतागताभ्यां सावेगम् अग्राङ्गुलिर् अस्य तूणौ ।विधेयमार्गे मतिर् उत्सुकस्य नयप्रयोगाव् इव गां जिगीषोः ॥

17.39

बभार शून्याकृतिर् अर्जुनस् तौ महेषुधी वीतमहेषुजालौ ।युगान्तसंशुष्कजलौ विजिह्मः पूर्वापरौ लोक इवाम्बुराशी ॥

17.40

तेनातिमित्तेन तथा न पार्थस् तयोर् यथा रिक्ततयानुतेपे ।स्वाम् आपदं प्रोज्झ्य विपत्तिमग्नं शोचन्ति सन्तो ह्य् उपकारिपक्षम् ॥

17.41

प्रतिक्रियायै विधुरः स तस्मात् कृच्छ्रेण विश्लेषम् इयाय हस्तः ।पराङ्मुखत्वे ऽपि कृतोपकारात् तूणीमुखान् मित्रकुलाद् इवार्यः ॥

17.42

पश्चात्क्रिया तूणयुगस्य भर्तुर् जज्ञे तदानीम् उपकारिणीव ।सम्भावनायाम् अधरीकृतायां पत्युः पुरः साहसम् आसितव्यम् ॥

17.43

तं शम्भुर् आक्षिप्तमहेषुजालं लोहैः शरैर् मर्मसु निस्तुतोद ।हृत्तोत्तरं तत्त्वविचारमध्ये वक्तेव दोषैर् गुरुभिर् विपक्षम् ॥

17.44

जहार चास्माद् अचिरेण वर्म ज्वलन्मणिद्योतितहैमलेखम् ।चण्डः पतङ्गान् मरुदेकनीलं तडित्वतः खण्डम् इवाम्बुदस्य ॥

17.45

विकोशनिर्धौततनोर् महासेः फणावतश् च त्वचि विच्युतायाम् ।प्रतिद्विपाबद्धरुषः समक्षं नागस्य चाक्षिप्तमुखच्छदस्य ॥

17.46

विबोधितस्य ध्वनिना घनानां हरेर् अपेतस्य च शैलरन्ध्रात् ।निरस्तधूमस्य च रात्रिवह्नेर् विना तनुत्रेण रुचिं स भेजे ॥

17.47

अचित्ततायाम् अपि नाम युक्ताम् अनूर्ध्वतां प्राप्य तदीयकृच्छ्रे ।महीं गतौ ताव् इषुधी तदानीं विवव्रतुश् चेतनयेव योगम् ॥

17.48

स्थितं विशुद्धे नभसीव सत्त्वे धाम्ना तपोवीर्यमयेन युक्तम् ।शस्त्राभिघातैस् तम् अजस्रम् ईशस् त्वष्टा विवस्वन्तम् इवोल्लिलेख ॥

17.49

संरम्भवेगोज्झितवेदनेषु गात्रेषु बाहिर्यम् उपागतेषु ।मुनेर् बभूवागणितेषुराशेर् लौहस् तिरस्कार इवात्ममन्युः ॥

17.50

ततो ऽनुपूर्वायतवृत्तबाहुः श्रीमान् क्षरल्लोहितदिग्धदेहः ।आस्कन्द्य वेगेन विमुक्तनादः क्षितिं विधुन्वन्न् इव पार्ष्णिघातैः ॥

17.51

साम्यं गतेनाशनिना मघोनः शशाङ्कखण्डाकृतिपाण्डुरेण ।शम्भुं बिभित्सुर् धनुषा जघान स्तम्बं विषाणेन महान् इवेभः ॥

17.52

रयेण सा संनिदधे पतन्ती भवोद्धवेनात्मनि चापयष्टिः ।समुद्धृता सिन्धुर् अनेकमार्गा परे स्थितेनौजसि जह्नुनेव ॥

17.53

विकार्मुकः कर्मसु शोचनीयः परिच्युतौदार्य इवोपचारः ।विचिक्षिपे शूलभृता सलीलं स पत्रिभिर् दूरम् अदूरपातैः ॥

17.54

उपोढकल्याणफलो ऽभिरक्षन् वीरव्रतं पुण्यरणाश्रमस्थः ।जपोपवासैर् इव संयतात्मा तेपे मुनिस् तैर् इषुभिः शिवस्य ॥

17.55

ततो ऽग्रभूमिं व्यवसायसिद्धेः सीमानम् अन्यैर् अतिदुस्तरं सः ।तेजःश्रियाम् आश्रयम् उत्तमासिं साक्षाद् अहंकारम् इवाललम्बे ॥

17.56

शरान् अवघ्नन् अनवद्यकर्मा चचार चित्रं प्रविचारमार्गैः ।हस्तेन निस्त्रिंशभृता स दीप्तः सार्कांशुना वारिधिर् ऊर्मिणेव ॥

17.57

यथा निजे वर्त्मनि भाति भाभिश् च्यायामयश् चाप्सु सहस्ररश्मिः ।तथा नभस्य् आशु रणस्थलीषु स्पष्टद्विमूर्तिर् ददृशे स भूतैः ॥

17.58

शिवप्रणुन्नेन शिलीमुखेन त्सरुप्रदेशाद् अपवर्जिताङ्गः ।ज्वलन्न् असिस् तस्य पपात पाणेर् घनस्य वप्राद् इव वैद्युतो ऽग्निः ॥

17.59

आक्षिप्तचापावरणेषुजालश् छिन्नोत्तमासिः स मृधे ऽवधूतः ।रिक्तः प्रकाशश् च बभूव भूमेर् उत्सादितोद्यान इव प्रदेशः ॥

17.60

स खण्डनं प्राप्य परात् अमर्षवान् भुजद्वितीयो ऽपि विजेतुम् इच्छया ।ससर्ज वृष्टिं परिरुग्णपादपां द्रवेतरेषां पयसाम् इवाश्मनाम् ॥

17.61

नीरन्ध्रं परिगमिते क्षयं पृषत्कैर् भूतानाम् अधिपतिना शिलाविताने ।उच्छ्रायस्थगितनभोदिगन्तरालं चिक्षेप क्षितिरुहजालम् इन्द्रसूनुः ॥

17.62

निःशेषं शकलितवल्कलाङ्गसारैः कुर्वद्भिर् भुवम् अभितः कषायचित्राम् ।ईशानः सकुसुमपल्लवैर् नगैस् तैर् आतेने बलिम् इव रङ्गदेवताभ्यः ॥

17.63

उन्मज्जन् मकर इवामारापगाया वेगेन प्रतिमुखम् एत्य बाणनद्याः ।गाण्डीवी कनकशिलानिभं भुजाभ्याम् आजघ्ने विषम् अविलोचनस्य वक्षः ॥

17.64

अभिलषत उपायं विक्रमं कीर्तिलक्ष्म्योर् असुगमम् अरिसैन्यैर् अङ्कम् अभ्यागतस्य ।जनक इव शिशुत्वे सुप्रियस्यैकसूनोर् अविनयम् अपि सेहे पाण्डवस्य स्मरारिः ॥

18.1

तत उदग्र इव द्विरदे मुनौ रणम् उपेयुषि भीमभुजायुधे ।धनुर् अपास्य सबाणधि शंकरः प्रतिजघान घनैर् इव मुष्टिभिः ॥

18.2

हरपृथासुतयोर् ध्वनिर् उत्पतन्न् अमृदुसंवलिताङ्गुलिपाणिजः ।स्फुटदनल्पशिलारवदारुणः प्रतिननाद दरीषु दरीभृतः ॥

18.3

शिवभुजाहतिभिन्नपृथुक्षतीः सुखम् इवानुबभूव कपिध्वजः ।क इव नाम बृहन्मनसां भवेद् अनुकृतेर् अपि सत्त्ववतां क्षमः ॥

18.4

व्रणमुखच्युतशोणितशीकरस्थगितशैलतटाभभुजान्तरः ।अभिनवौषसरागभृता बभौ जलधरेण समानम् उमापतिः ॥

18.5

उरसि शूलभृतः प्रहिता मुहुः प्रतिहतिं ययुर् अर्जुनमुष्टयः ।भृशरया इव सह्यमहीभृतः पृथुनि रोधसि सिन्धुमहोर्मयः ॥

18.6

निपतिते ऽधिशिरोधरम् आयते समम् अरत्नियुगे ऽयुगचक्षुषः ।त्रिचतुरेषु पदेषु किरीटिना लुलितदृष्टि मदाद् इव चस्खले ॥

18.7

अभिभवोदितमन्युविदीपितः समभिसृत्य भृशं जवम् ओजसा ।भुजयुगेन विभज्य समाददे शशिकलाभरणस्य भुजद्वयम् ॥

18.8

प्रववृते ऽथ महाहवमल्लयोर् अचलसंचलनाहरणो रणः ।करणशृङ्खलसंकलनागुरुर् गुरुभुजायुधगर्वितयोस् तयोः ॥

18.9

अयम् असौ भगवान् उत पाण्डवः स्थितम् अवाङ् मुनिना शशिमौलिना ।समधिरूढम् अजेन नु जिष्णुना स्विद् इति वेगवशान् मुमुहे गणैः ॥

18.10

प्रचलिते चलितं स्थितम् आस्थिते विनमिते नतम् उन्नतम् उन्नतौ ।वृषकपिध्वजयोर् असहिष्णुना मुहुर् अभावभयाद् इव भूभृता ॥

18.11

करणशृङ्खलनिःसृतयोस् तयोः कृतभुजध्वनि वल्गु विवल्गतोः ।चरणपातनिपातितरोधरसः प्रससृपुः सरितः परितः स्थलीः ॥

18.12

वियति वेगपरिप्लुतम् अन्तरा समभिसृत्य रयेण कपिध्वजः ।चरणयोश् चरणानमितक्षितिर् निजगृहे तिसृणां जयिनं पुराम् ॥

18.13

विस्मितः सपदि तेन कर्मणा कर्मणां क्षयकरः परः पुमान् ।क्षेप्तुकामम् अवनौ तम् अक्लमं निष्पिपेष परिरभ्य वक्षसा ॥

18.14

तपसा तथा न मुदम् अस्य ययौ भगवान् यथा विपुलसत्त्वतया ।गुणसंहतेः समतिरिक्तम् अहो निजम् एव सत्त्वम् उपकारि सताम् ॥

18.15

अथ हिमशुचिभस्मभूषितं शिरसि विराजितम् इन्दुलेखया ।स्ववपुर् अतिमनोहरं हरं दधतम् उदीक्ष्य ननाम पाण्डवः ॥

18.16

सहशरधि निजं तथा कार्मुकं वपुर् अतनु तथैव संवर्मितम् ।निहितम् अपि तथैव पश्यन्न् असिं वृषभगतिर् उपाययौ विस्मयम् ॥

18.17

सिषिचुर् अवनिम् अम्बुवाहाः शनैः सुरकुसुमम् इयाय चित्रं दिवः ।विमलरुचि भृशं नभो दुन्दुभेर् ध्वनिर् अखिलम् अनाहतस्यानशे ॥

18.18

आसेदुषां गोत्रभिदो ऽनुवृत्त्या गोपायकानां भुवनत्रयस्य ।रोचिष्णुरत्नावलिभिर् विमानैर् द्यौर् आचिता तारकितेव रेजे ॥

18.19

हंसा बृहन्तः सुरसद्मवाहाः संह्रादिकण्ठाभरणाः पतन्तः ।चक्रुः प्रयत्नेन विकीर्यमाणैर् व्योम्नः परिष्वङ्गम् इवाग्रपक्षैः ॥

18.20

मुदितमधुलिहो वितानीकृताः स्रज उपरि वितत्य सातानिकीः ।जलद इव निषेदिवांसं वृषे मरुदुपसुखयांबभूवेश्वरम् ॥

18.21

कृतधृति परिवन्दितेनोच्चकैर् गणपतिभिर् अभिन्नरोमोद्गमैः ।तपसि कृतफले फलज्यायसी स्तुतिर् इति जगदे हरेः सूनुना ॥

18.22

शरणं भवन्तम् अतिकारुणिकं भव भक्तिगम्यम् अधिगम्य जनाः ।जितमृत्यवो ऽजित भवन्ति भये ससुरासुरस्य जगतः शरणम् ॥

18.23

विपद् एति तावद् अवसादकरी न च कामसम्पद् अभिकामयते ।न नमन्ति चैकपुरुषं पुरुषास् तव यावद् ईश न नतिः क्रियते ॥

18.24

संसेवन्ते दानशीला विमुक्त्य सम्पश्यन्तो जन्मदुःखं पुमांसः ।यन्निःसङ्गस् त्वं फलस्यानतेभ्यस् तत् कारुण्यं केवलं न स्वकार्यम् ॥

18.25

प्राप्यते यद् इह दूरम् अगत्वा यत् फलत्य् अपरलोकगताय ।तीर्थम् अस्ति न भवार्णवबाह्यं सार्वकामिकम् ऋते भवतस् तत् ॥

18.26

व्रजति शुचि पदं त्व् अति प्रीतिमान् प्रतिहतम् अतिर् एति घोरां गतिम् ।इयम् अनघ निमित्तशक्तिः परा तव वरद न चित्तभेदः क्वचित् ॥

18.27

दक्षिणां प्रणतदक्षिण मूर्तिं तत्त्वतः शिवकरीम् अविदित्वा ।रागिणापि विहिता तव भक्त्या संस्मृतिर् भव भवत्य् अभवाय ॥

18.28

दृष्ट्वा दृश्यान्य् आचरणीयानि विधाय प्रेक्षाकारी याति पदं मुक्तम् अपायैः ।सम्यग्दृष्टिस् तस्य परं पश्यति यस् त्वां यश् चोपास्ति साधु विधेयं स विधत्ते ॥

18.29

युक्ताः स्वशक्त्या मुनयः प्रजानां हितोपदेशैर् उपकारवन्तः ।समुच्छिनत्सि त्वम् अचिन्त्यधामा कर्माण्य् उपेतस्य दुरुत्तराणि ॥

18.30

संनिबद्धम् अपहर्तुम् अहार्यं भूरि दुर्गतिभयं भुवनानाम् ।अद्भुताकृतिम् इमाम् अतिमायस् त्वं बिभर्षि करुणामय मायाम् ॥

18.31

न रागि चेतः परमा विलासिता वधूः शरीरे ऽस्ति न चास्ति मन्मथः ।नमस्क्रिया चोषसि दातुर् इत्य् अहो निसर्गदुर्बोधम् इदं तवेहितम् ॥

18.32

तवोत्तरीयं करिचर्म साङ्गजं ज्वलन्मणिः सारशनं महानहिः ।स्रग् आस्यपङ्क्तिः शवभस्म चन्दनं कला हिमांशोश् च समं चकासति ॥

18.33

अविग्रहस्याप्य् अतुलेन हेतुना समेतभिन्नद्वयमूर्ति तिष्ठतः ।तवैव नान्यस्य जगत्सु दृश्यते विरुद्धवेषाभरणस्य कान्तता ॥

18.34

आत्मलाभपरिणामनिरोधैर् भूतसंघ इव न त्वम् उपेतः ।तेन सर्वभुवनातिग लोके नोपमानम् असि नाप्य् उपेमयः ॥

18.35

त्वम् अन्तकः स्थावरजङ्गमानां त्वया जगत् प्राणिति देव विश्वम् ।त्वं योगिनां हेतुफले रुणत्सि त्वं कारणं कारणकारणानाम् ॥

18.36

रक्षोभिः सुरमनुजैर् दितेः सुतैर् वा यल् लोकेष्व् अविकलम् आप्तम् आधिपत्यम् ।पाविन्याः शरणगतार्तिहारिणे तन् माहात्म्यं भव भवते नमस्क्रियायाः ॥

18.37

तरसा भुवनानि यो बिभर्ति ध्वनति ब्रह्म यतः परं पवित्रम् ।परितो दुरितानि यः पुनीते शिव तस्मै पवनातने नमस् ते ॥

18.38

भवतः स्मरतां सदासने जयिनि ब्रह्ममये निषेदुषाम् ।दहते भवबीजसंततिं शिखिने ऽनेकशिखाय ते नमः ॥

18.39

आबाधामरणभयार्चिषा चिराय प्लुष्टेभ्यो भव महता भवानलेन ।निर्वाणं समुपगमेन यच्छते ते बीजानां प्रभव नमो ऽस्तु जीवनाय ॥

18.40

यः सर्वेषाम् आवरीता वरीयान् सर्वैर् भावैर् नावृतो ऽनादिनिष्ठः ।मार्गातीतायेन्द्रियाणां नमस् ते ऽविज्ञेयाय व्योमरूपाय तस्मै ॥

18.41

अणीयसे विश्वविधारिणे नमो नमो ऽन्तिकस्थाय नमो दवीयसे ।अतीत्य वाचां मनसां च गोचरं स्थिताय ते तत्पतये नमो नमः ॥

18.42

असंविदानस्य ममेश संविदां तितिक्षितुं दुश्चरितं त्वम् अर्हसि ।विरोध्य मोहात् पुनर् अभ्युपेयुषां गतिर् भवान् एव दुरात्मनापि ॥

18.43

आस्तिक्यशुद्धम् अवतः प्रियधर्म धर्मं धर्मात्मजस्य विहितागसि शत्रुवर्गे ।सम्प्राप्नुयां विजयम् ईश यया समृद्ध्या तां भूतनाथ विभुतां वितराहवेषु ॥

18.44

इति निगदितवन्तं सूनुम् उच्चैर् मघोनः प्रणतशिरसम् ईशः सादरं सान्त्वयित्वा ।ज्वलदनलपरीतं रौद्रम् अस्त्रं दधानं धनुरुपपदम् अस्मै वेदम् अभ्यादिदेश ॥

18.45

स पिङ्गाक्षः श्रीमान् भुवनमहनीयेन महसा तनुं भीमां बिभ्रत् त्रिगुणपरिवारप्रहरणः ।परीत्येशानं त्रिः स्तुतिभिर् उपगीतः सुरगणैः सुतं पाण्डोर् वीरं जलदम् इव भास्वान् अभिययौ ॥

18.46

अथ शशधरमौलेर् अभ्यनुज्ञाम् अवाप्य त्रिदशपतिपुरोगाः पूर्णकामाय तस्मै ।अवितथफलम् आशिर्वादम् आरोपयन्तो विजयि विविधम् अस्त्रं लोकपाला वितेरुः ॥

18.47

असंहार्योत्साहं जयिनम् उदयं प्राप्य तरसा धुरं गुर्वीं वोढुं स्थितम् अनवसादाय जगतः ।स्वधाम्ना लोकानां तम् उपरि कृतस्थानम् अमरास् तपोलक्ष्म्या दीप्तं दिनकृतम् इवोच्चैर् उपजगुः ॥

18.48

व्रज जय रिपुलोकं पादपद्मानतः सन् गदित इति शिवेन श्लाघितो देवसंघैः ।निजगृहम् अथ गत्वा सादरं पाण्डुपुत्रो धृतगुरुजयलक्ष्मीर् धर्मसूनुं ननाम ॥